(4) Vikrama Rāja, the Rājā of Devagrāma and the surrounding country, washed by the waves of the rivers of Bāla-Valabhī or Bagḍi, one of the five provinces into which Bengal was divided.
(5) Lakṣmīśūra, the ruler of Apara Mandāra, and the lord of all the forest feudatories.
(6) Śurapāla, the lion in destroying the elephants of Kūjabaṭi.
(7) Rudraśekhara of Tailakampa, the modern Telkupi near Pachet.
(8) Mayagala Siṅha, the king of Ucchāla.
(9) Pratāpa Siṅha, the king of Ḍhekkarīya or Ḍhekura on the other side of the river Ajaya near Katwa.
(10) Narasiṅhārjuna, the king of Kayaṅgala.
(11) Caṇḍārjuna of Saṅkaṭagrāma.
(12) Vijayarāja of Nidrāvala.
(13) Dvorapabardhana of Kauśāmbi.
(14) Soma, Rājā of Padubanvā or Pabnā (?)

But the warriors on whom Rāmapāla relied in this crisis were, Rāṣṭrakuṭa princes, Kāhnura Deva who was Mahāmāṇḍalika, and Śivarāja Deva who was Mahāpratīhāra. These were son and nephew of Mahana or Mathana, his maternal uncle. This warrior, Mahana, riding on his famous elephant, Bindhya Māṇikya, defeated Devarakṣita, the Rājā of Pīṭhī, in Magadha. Kāhnura Deva was his son, and Śivarāja was the son of his brother Suvarṇa Deva.

Bridge of boats.

The allied army threw a bridge of boats on the Ganges, crossed the river and advanced and destroyed the Ḍamara, and took Bhīma a captive while riding on his elephant in the battle-field. He was placed in charge of Vittapāla, who showed him all hospitality, and treated him very kindly

But Hari, a friend of Bhīma, rallied the scattered Kaivarta army and advanced to fight. It was a well-contested battle in which both sides lost much. Rāmapāla's son contested every inch of ground, and established his power. Hari at last found himself powerless, was captured, and led to the place of execution. Bhīma, too, seems to have been put to the sword.

The foundation of Rāmāvatī, the Rāmapāla in Dacca.

Rāmapāla founded a city named Rāmāvatī at the confluence of the Ganges and the Karatoyā in the Bārendrī country. In the choice of the site of the city, Rāmapāla seems to have taken the advice of Rājā Caṇḍeśvara of Śrīhaṭṭa Śrīhetu, and of Kṣemeśvara. The city was in a short time beautified with the temples of various Hindu gods and goddesses, and Brāhmaṇas and Bhikṣus had their residences in it. A great Vihāra was erected under the name of Jāgaddalavihāra. The city contained an image of Avalokiteśvara, whose greatness consisted in saving all sentient beings. Near it was a place of pilgrimage called Apunarbhava. In a short time the

city was planted with many gardens, and many large tanks were excavated in it, and market places there contained merchandise from various quarters of the earth. The king himself excavated a tank as large as an ocean, with sides as high as chains of mountains on the seaside. An eastern potentate propitiated him with large elephants, chariots, and armour, for extending his protection to him. He conquered Utkala and restored it to the Nāgavaṃsīs; and so he ruled all the countries down to Kalīnga. Māyana conquered Kāmarūpa and other countries for the king.

His Council.

Rāmapāla tried to surround himself by men eminent in science and literature. His prime-minister was Bodhideva, the son of Yogadeva, the hereditary prime-minister of the Pāla family. His war minister was Prajāpati Nandī, the father of Sandhyākara Nandī, the author of the Rāmacarita, a Brāhmaṇa of Vārendra distribution in Bengal. Sandhyākara had the rare advantage of the position of his father to know fully and minutely the military strength of the Pāla empire. His book is, therefore, of a great value as a record of the contemporary history of the later Pālas.

His chief medical officer was Bhadreśvara, both a physician and a poet. The grandfather of Bhadreśvara, Devagaṇa by name, was the court physician of that Govinda Candra, contemporary of Mahīpāla and Rājendra Coḍa, so well known in Bengali songs. Bhadreśvara's son was Sureśvara, the author of a Sanskrit dictionary of medical botany, who served under a king named Bhīma Pāla, the ruler of Pādi, perhaps the same Bhīma who wrested northern Bengal from the Pālas for a time.

The Death of Rāmapāla.

Rāmapāla lived at Rāmāvatī, leaving the cares of his government to his son. The country prospered greatly, and he was never disturbed by wicked people. Rājyapāla governed the kingdom with wisdom and tact, which much pleased his father Rāmapāla. Just at this time, Mathana, his friend, died. When residing at Munger, the king heard of his death, distributed much wealth to Brāhmaṇas and entered the sacred river with a view to proceed to heaven.

On his death, his enemies became very jubilant. But Kumārapāla, his son, put them down.

Vaidyadeva—his successor's General.

All except north Bengal revolted, but Vaidya Deva, his minister, with a strong navy restored peace to the whole empire; when Kumārapāla was anxious to reward the merit of this useful minister, news was received that Tigmadeva, the king of Kāmarūpa, was meditating independence. He at once appointed Vaidya Deva the king of Kāmrūpa, and sent him with a strong army to dethrone Tigmadeva. Vaidya Deva easily overthrew the king and took his place.[1]

Gopala III.

Kumārapāla died shortly after, and Gopal III his son, too, after a short reign breathed his last. Madanapāla, the second son of Rāmapāla, now became king; the short reigns of the

[1] Epigraphia Indica, vol. ii, p. 347.

previous kings had so weakened the power of the Pālas that Madanapāla had to preserve the prestige of the Pāla empire by a close alliance with Candra Deva, the founder of the Gahaḍavāḍa kingdom of Kanauj. The alliance seems to have been an offensive and defensive one. For the Bengal army fought a battle against the enemies of Kanauj on the banks of the Yamunā. Candra Deva's inscriptions range from 1090 to 1104. Madanapāla lived about this time. One of his inscription was dated the 14th year of his reign.

Madanapāla.

There is an inscription commemorating a grant of land made by Madanapāla Deva in the 8th year of his reign[1] from the victorious camp at Rāmāvatī to Baṭesvara Svāmī at Pauṇḍrabardhanabhukti for reciting the Mahābhārata before the chief queen Citramālikā.[1] Another inscription of the same king at Jayanagara near the Laksmīsarai station is dated in the 19th year of his reign.[2] The letter for 9 is doubtful. It is most likely 4. So instead of nineteen we should rather say fourteen. .These two inscriptions plainly show that Madanapāla's empire included East Bengal, North Bengal, and Behar. The 14th year of Madanapāla would come close to the year 1119, the initial year of the Lakṣmaṇa Sena Era. It is a curious fact, however, that no inscription of the Pāla kings has yet been discovered in the Rāḍha country, that is, the Burdwan Division of Bengal. The first inscription comes from Pāṭaliputra, the second from Monghyr, the third and fourth from Bhāgalpur, some from Dinajpur, and the last one from Dacca.

There are two more inscriptions of a king named Mahendrapāla—one dated in the 8th, and the other in the 19th year of his reign Both are from Gayā and its vicinity. He may have belonged to the Pāla dynasty, but there is nothing to show his connection with them. A second king, Govindapāla, is mentioned in a Gayā inscription dated 1175, which states that he lost his kingdom 14 years ago, *i.e.*, 1161. So the last vestige of the Pāla Empire seems to have come to an end in that year. There are some MSS. from Nepal dated in the 37th, 38th and 39th year after the loss of Govindapāla's kingdom, *i.e.*, 1198, 1199 and 1200 A.D.

Mahendrapāla and Govindapāla.

The Bhāgalpur grant of Nārāyaṇapāla records a grant of land at Tīrabhukti at Mithilā. With the rise of the Chedis under Gāṅgeya and Karṇa, they seem to have lost their hold on that country. It then formed a part ot the Chedi Empire, north of the Ganges, and they passed into the hands of the Karṇāṭakas, who helped the Chedis in building up their empire. Nānya was the first Karṇāṭaka king. A manuscript copied during his reign is dated 1098 A.D[3] Nānya Deva's family reigned quietly at Mithilā, sometimes paying tributes to the Pālas, sometimes to the Chedies at Gorakhpur, sometimes to the Mahomedans at Delhi, till Harisiṅha of this family in 1325 rebelled against Emperor Ghyāsuddin and defeated the Delhi troops. The event was signalised by

History of Mithilā.

---

[1] J.A.S.B., vol. lxix, p. 68.

[2] C.A.S.R., vol. iii, p. 125, and plate xlv, No. 17.

[3] Epi. In., vol. i, p. 318, Note 57.

the performance of an original drama entitled 'Dhūrta samāgama' by Jyotirīśvara Kavi Śekharācārya. Harisiṁha invaded Nepal, and since then the rājās of his family kept political connections with that kingdom, till about 1400 A.D. the descendants of Harisiṁha became, by marriage, the rulers of Nepal, and lost their position in Mithilā by the rise of the Brāhmaṇa Rājās under Kāmeśa. The kings of Mithilā always patronised Sanskrit and vernacular literature; and it is possible to compile a connected literary history of Mithilā from Nānya Deva up to very recent times.

# रामचरितं।

श्रीघनाय नमः सदा।

## प्रथमः परिच्छेदः।

**श्रीः श्रयति यस्य कण्ठं कृष्णं तं बिभ्रतं भुजेनागं।**
**दधतं कं दामजटालम्बंशशिखण्डम[ण्ड]नं वन्दे॥ १॥**

श्रीघनाय नमः।

श्रीरित्यादि। तं शशिखण्डमण्डनं महेश्वरं वन्दे। यस्य कण्ठं कृष्णं श्यामं शीर्णशवलज्वालयेत्यर्थात्। श्रीः शोभा श्रयति। भुजेन अगं शेषं बिभ्रतं, कं दाम कपालमालां जटालम्बं जटालम्बि दधतं। एकः पक्षः॥

पुण्डरीकाक्षपक्षे तु तं कृष्णं वासुदेवं वन्दे। यस्य कण्ठं श्रीर्लक्ष्मीः श्रयति कण्ठालिङ्गनं करोतीति यावत्। भुजेन बाहुना अगं पर्व्वतं गोवर्द्धनाख्यं बिभ्रतं कं शिरः दामजटालं दाम्ना बालरज्वा जटालं दधतं वंशो वाद्यवेणुः शिखण्डो मयूरपिच्छं तौ मण्डने यस्य इत्यपरः पक्षः॥ १॥

**कंसहरः कम्बलिदमनपादः सहिमाविभू रचयतात् वः।**
**येन प्राक् सुरसेना विषमाशुगदाहतोपकृता॥ २॥**

कंस इत्यादि। स हरः महेश्वरः। कं सुखं वो रचयतात्। कम्बली सास्नावान् बलीवर्द्दः। वाहनत्वात् तस्य दमनं पदमङ्घ्रिर्यस्य। अविः पर्व्वतः। अविर्मेघे रवावद्रावित्यजयः। हिमाविर्हिमगिरिस्तस्माद्भूतेति हिमा[वि]भूर्गौरी तया सह वर्त्तत इति सहिमाविभूः सगौरीकः। विष[मा]शुगः कामदेवः तस्य दाहात् भस्मीकरणात्। सुरसेना देवचमूः। येन प्राक् प्रथममपकृता पश्चादुपकृतैवेति प्राक्पदाभिप्रायः।

अन्यच्च स कंसहरो वासुदेवः कं सुखं रचयतात्, बलिरसुरः स हि त्रिविक्रमरूपेण हरिणा पदाक्रान्त्या दान्तः। हि हेतौ माविभूः लक्ष्मीपतिः। प्राक्सुराः पूर्व्वदेवाः असुराः। तेषां सेना चमूः। विषमा क्रूरा। आशु शीघ्रं येन गदाहता सती उपकृता; "हता हि हरिणा दैत्याः प्राप्नुवन्ति परां गतिं"॥ २॥

श्रियमुन्मुद्रितलक्ष्मीयुगलं [१]कमलानामिनः स वस्तनुतां ।
कृत्वालोकाहरणं महाक्षये यं विधुर्विशति ॥ ३ ॥

श्रियमित्यादि । इनः सूर्य्यः श्रियं वः तनुतां कमलानामरविन्दानां विकासितत्वात्[२] उन्मुद्रित[३]-लक्ष्मीकः । उन्मुद्रिता प्रकाशिता लक्ष्मीः कमलालया वा येन महाक्षये महति क्षीणत्वे सति आलोकाहरणं कृत्वा, उद्योतमाहृत्य यं सूर्य्यं विधुश्चन्द्रो विशति । कृष्णपक्षे हि क्रमेण क्षयातिशयमासादयन् इन्दुरुद्योत-रहितो दर्शदिवसे सूर्य्यमण्डलमवलम्बते ॥

समुद्रपक्षे कमलानामिनः पतिः समुद्रः श्रियं वः तनुतां इत एव लक्ष्मीप्रादुर्भावात् उन्मुद्रितलक्ष्मीकः । महाक्षये महाप्रलये लोकाहरणं कृत्वा लोकान् कुक्षौ निक्षिप्य यं समुद्रं विधु र्वासुदेवो विशति ॥ ३ ॥

तत्कुलदीपो नृपतिरभू[त्] धर्म्मो धामवानिवेक्ष्वाकुः ।
यस्याब्धिं तीर्णाग्रावनौ रराजापि कीर्त्तिरवदाता ॥ ४ ॥

तत्कुलदीप इत्यादि । सूर्य्यकुलप्रदीप इक्ष्वाकु र्नाम नृपतिरभूत् । धामवानिव धर्म्मः, यस्य कीर्त्ति-रब्धिं तीर्णा समुद्रपारं गता । अग्रा उत्कृष्टा । अवनौ रराजापि पृथिव्यामपि रराज । अवदाता[४] शुभ्रा ॥

अन्यच्च समुद्रकुलदीपो धर्म्मः धर्म्मनामा धर्म्मपाल इति यावत् । नृपतिरभूत् । एकदेशेन समुदायः, यथा भीमो भीमसेन इति । धामवान् तेजस्वी इव यथा इक्ष्वाकुः कटुतुम्बी उत्प्लवते, तथा यस्य ग्रावनौः शिलानौका, अब्धिं तीर्णा समुद्रप्रासादादन्तरीक्षमिव तीर्णवती रराज, अपि शब्दात् कीर्त्तिरपि समुद्रं तीर्णा रराज ॥ ४ ॥

येन महीधरसारेणोर्व्वीपालान्वयावतंसेन ।
लक्ष्मीपतिनाम्बुनिधेरूहे भूदाररूपेण ॥ ५ ॥

येनेत्यादि । येन इक्ष्वाकुणा मही पृथ्वी आ अम्बुनिधेः आसमुद्रं ऊहे ऊढा, धरः पर्व्वतः, धरसार इव सारो यस्य यद्वा ईधरसारः लक्ष्मीधरसारः । उर्व्वीपालानां नृपाणां अन्वयस्य अवतंसेन भूषणेन अतएव लक्ष्मीपति[ना] श्रियःपत्या भूः पृथ्वी दारस्वरूपा प्रशस्तदारा वा यस्य । अत एव ऊहे (ढ़े) ऊढ़ा ॥

अन्यच्च येन धर्म्मेण पालान्वयावतंसे[ने]ति विशेषणं ततश्च पालपद्धतिना धर्म्मपालेनेत्यर्थः । उर्व्वी पृथ्वी ऊहे महीधरसारेण महीधरः पर्व्वतः आदिवराहो वा शेषं पूर्व्ववत् । अपि च लक्ष्मीपतिनेति पदेन वासुदेवाभिधायिना श्लेषोपमालङ्कारमाकारयति । इवार्थो गम्यः यथा सिंहो मानवकः । यथा हरिणा भूदाररूपेण वराहरूपेण अम्बुनिधेः सकाशात् मही ऊढ़ा । धरसारेण धरस्येव सारो यस्य । धरं वा गोवर्द्धनं सारयति अपसारयति । ऊर्व्वीपालान्वयस्य सीरस्य रामरूपेण सौम्यस्य कृष्णरूपेण अवतंसतां गतेन ॥ ५ ॥

---

१ The comm. omits ०युगलं and makes ०लक्ष्मीकः ।

२ The omission of त makes better sense.

३ Comm. उन्मूखद्रि ।    ४ Comm. अवशता ।

वंशे तस्य वभूवु र्भर्त्तुर्भुवनस्य [1]भू[पतयः ।
कीर्त्तिसुरसिन्धुधवलोल्लङ्घितजलधिक्षालितत्रिभुवनाः ॥ ६ ॥

वंश इत्यादि । उभयत्रापि समं सुगमञ्च एकत्र कीर्त्तिश्च सुरसिन्धुश्चेति द्वन्द्वगर्भता भगीरथेन सुरसिन्धोरवतारणात् । अपरत्र कीर्त्तिः सुरसिन्धुरिवेति गर्भः । साधर्म्यन्तु धवलिमजलधिलङ्घनत्रिभुवनक्षालनलक्षणमिति विशेषः ॥ ६ ॥

ये वसुधां गोत्रभिदं ईशाद्दीनमुत्तोलयितारः ।
दधुरधर]यन्तः स्वरूपचितदोषमविभरुस्त्रिदिवम् ॥ ७ ॥

ये वस्वित्यादि । ये भूपा ईशस्य प्रभोरलङ्कारभूतं अहीनं सज्जनमुत्तो(त्तु)लयितारः उन्नतिं नेतारः इति युक्तकारिणः । तथा गोत्रभिदं कुलाघातिनं स्वरूपचितदोषं स्वरूपेण सञ्चिता दोषा येन तमधरयन्तः अधः कुर्व्वन्त इत्यपि युक्तकारिणः । वसुधां दधुः, अध्वरविधिना च त्रिदिवं विभरामबभूवुः, उत्क्रान्तौ वा तथा कुर्य्युः शब्दच्छलमिलितमपरार्थमर्थान्तरमपि करतलमवतारयन्तः कवन्ते सन्तः ॥

तदयमर्थः । महेश्वरभूषणशेषं चेत् उपरिकृतवन्तः अतो धारकमपरमपश्यन्तः स्वयमेव धरित्रीधुरां दधुः । तथा इन्द्रं(दं) स्वरुणा वज्रेण उपचितवाङ्क्ष्च्छेदधरितवन्तः अतः स्वयं स्वर्गं विभ्रति स्म । अपि च नाकाधिपतिं अधोभुवनाधिपतिं मर्त्त्यं मर्त्त्याधिपतिमात्मानं नाकाधिपतिमनुविदधानास्त्रिभुवनव्यवस्थितिमिति घटयत । ७ ॥

हरिणोपासितधामाविग्रहपालः किलाभवद्राजा ।
नतभूभृत्पङ्क्तिरथो गोत्ररत्नाकरेऽमुष्मिन् ॥ ८ ॥

हरिणेत्यादि । अमुष्मिन् गोत्रे कुले रत्नाकरे पुरुषरत्नानां आकरे पङ्क्तिरथो दशरथो नाम राजाभूत् । हरिणोपासितधामा वासुदेवेन रामरूपेण उपासितमाश्रितं धाम गृहं यस्य अतएवाविग्रहपालः अस्य वासुदेवस्य विग्रहं मूर्त्तिं रामं पालितवान् यद्वा विग्रहपालः विग्रहं संग्रामं पालयति गच्छति संग्रामगतः सन् हरिणा इन्द्रेण उपासितधामा उपासितमर्च्चितं धाम[2] शौर्य्यं यस्य । तेन हि दशरथेन देवकार्य्यानुरोधेन मङ्गराङ्गनप्रणयिना दुर्ज्जयदनुतनुतनुजान् निर्जित्य विडोजाः स्वभुजशौर्य्यशौटीर्य्येण अशाचार्य्यः कृतः । अथवा विग्रहान् त्यक्तायुधगर्व्वान् पालयति अतएव नतभूभृत् नताः प्रणताः भूभृतो-राजानो यस्मै[3] यं वा ॥

अन्यत्र अथानन्तरं विग्रहपालो राजाभवत् हरिणा सिंहेन स्वधामतोऽप्यधिकतया उपासितमभ्यर्च्चितं स्वीकृतं धाम विक्रमो यस्य सिंहतोऽपि महाविक्रम इत्यर्थः । नतभूभृत्पङ्क्तिः प्रणतराजराजिः शेषं पूर्व्ववत् । राजेति चन्द्राभिधायिपदेन श्लेषोपमा । यथा चन्द्रो गोत्रे गां पानीयं त्रायत इति अपां पत्यौ रत्नाकरे

१ The portion bracketted has been restored from the commentary.

२ Comm. नाम ।

३ Comm. यस्मिन् ।

ऽभूत् हरिणेन मृगेन अङ्करूपेण उपमितं धाम वपुर्यस्य, अविग्रहोऽतनुः कामः तं पालयति तस्योदये तस्य प्रभावात्। नता न्यग्भूता पर्व्वतपङ्क्ति र्यस्मात् रथात् स तादृक् रथः स्यन्दनो यस्य ॥ ८ ॥

सहसावितरणजितकर्णः क्षौणीं यौवनश्रियोदूहे।
अश्रान्तदानवारातिशयो योभूद्वृषानुचरः ॥ ९ ॥

सहसेत्यादि। यो दशरथो यौवनश्रिया तरुणिमसंपत्त्या सह क्षौणीमुदूहे। सहसावितरणेनाविलम्बितदानेन जितः कर्णः कानीनो येन अश्रान्तोऽप्राप्तश्रमो दानवारातीनां देवानां शयः करो यस्मात्। अत एव हि असुरपराजयसिद्धैः विबुधैः करेण प्रहरणग्रहणश्रमोपि नासादितः। तथाहि वृषानुचरः शचीसहचरानुचरोभूत्।

अन्यच्च। यो विग्रहपालो यौवनश्रिया कर्णस्य राज्ञः सुतया सह क्षौणीमुदूढ़वान्। सहसा बलेनावितो रक्षितो रणजितः संग्रामजितः कर्णो दाहलाधिपति र्येन। रणजित एव परन्तु रक्षितो न उन्मूलितः। कपालसन्धिघ(म)टनात्। दानवारो दानसमुच्चयो भूमिकाञ्चनकरितुरगादिभि र्नानाप्रकारं दानं तस्यातिशयः प्राचुर्य्यं स चाश्रान्तोऽविच्छिन्नो यस्य अतएव [1]वृषानुचरो धर्म्मानुगतः। ९ ॥

अथ तस्य महीपालः सुरपालोपि पुरुषोत्तमो रामः।
स्फुरदृश्यशृङ्गसम्भावितरूपश्चारुभाग्यसम्पन्नः ॥ १० ॥
जगदवनैकधुरीणः सामयिकमहोमहानलो भरतः।
अपि लक्ष्मणोपि शत्रुघ्नलक्ष्मणो जज्ञिरे तनयाः ॥ ११ ॥

अथेत्यादि। श्लोकद्वयेन कुलकं। तस्य दशरथस्य तनयाः सुता जज्ञिरे। तत्र प्रथमं रामो रामभद्रो नाम। स च महीपालः महीं पालितवान्। सुरपालः सुरान् पालितवान् पुरुषोत्तमो हरिरवतीर्णः। स्फुरता ऋष्यशृङ्गेण मुनिना सम्भावितमुपेदितं रूपं स्वरूपं यस्य। अत्रैव विशेषः। चरुर्हव्यपाकस्तस्य भागोऽंशः चरुभागस्तस्य भावश्चारुभाग्यं तेन सम्पन्नः। तथाहि "ऋष्यशृङ्गचरोरंशः प्रथमोऽयं महाभुजः" ॥

अन्यच्च तस्य विग्रहपालस्य तनया जज्ञिरे। तत्र महीपालो नाम, ततः सुरपालो नाम। अपि समुच्चये। पुरुषोत्तमः पुरुषश्रेष्ठो रामो रामपालो नाम। स्फुरदृश्यं दर्शनीयं शृङ्गसम्भावितं प्रभावसमृद्धं रूपं यस्य, चारुणा भाग्येन सम्पन्नः।

जगदित्यादि रामभद्रानन्तरं भरतो नाम जगदवनैकधुरीणः महस्तेजो[2] महानल इव पूज्यो वह्निरिव सामयिको महोमहानलो यस्य। तथा च "समये यश्च तनोति तिग्मतां"। अपि लक्ष्मणो नाम। अपि शत्रुघ्नलक्ष्मणः शत्रुघ्ननामा इति चत्वारः।

अन्यच्च स रामपालः जगदवनैकधुरीणः सामयिकेन महसा महान् अलोभरतोऽलुब्धः लक्ष्मणः श्रीमान् शत्रुघ्नलक्ष्मणः शत्रुघ्नं लक्ष्मणं चिह्नं यस्य इति त्रयः ॥ ११ ॥

---

[1] The Comm. has वृत्तिसा° which is evidently a लिपिकरप्रमादः। [2] Comm. महत्तेजो।

ज्येष्ठस्तेषु विरेजे रामो लङ्केनभरनिमग्नायाः ।
उन्नमयिता धरायाः बलिधामक्षिदिव कादिषु मुखेषु ॥ १२ ॥

ज्येष्ठेत्यादि । तेषु रामादिषु चतुर्षु मध्येषु ज्येष्ठः अग्रजो रामो विरेजे । लङ्कायाः इनो राव(म)णस्तस्य भरेण निमग्नाया धराया उन्नमयिता उच्छ्राययिता ॥

अन्यच्च तेषु त्रिषु मध्ये रामो रामपालो ज्येष्ठः प्रशस्यतमो विरेजे । अलं शक्तौ अतएव केन सुखेन भरनिमग्नाया अतिशयनिमग्नायाः परेण कवलिताया धराया उन्नमयिता उद्धर्त्ता । केनः कं कुत्सित इनः कैवर्त्तनृपः तस्मिन् निमग्नाया वा । अत्रोपम[ा] वलिनोऽसुरस्य[1] धाम प्रभावं चिणोति वलिधामचित्(तः) वासुदेवः । स यथा वराहरूपः कादिषु ब्रह्मादिषु मुखेषु प्रधानेषु ब्रह्मविष्णुमहेश्वरमहेन्द्रेषु चतुर्षु । अन्यत्र एकं विना त्रिषु राजते । कस्य पानीयस्य इनः समुद्रस्तस्मिन् भरनिमग्नाया धराया उन्नमयिता । अपि च वलिधामचित् वलिसद्मचित् शेषमहीचिदत् स यथा कं वातं अत्तुं शीलं येषां तेषु कादिषु पवनाशनेषु नागेषु प्रधानेषु शेषवासुकितक्षकेषु कर्क्कोटकेषु चतुर्षु त्रिषु राजते । केन शिरसा धराया उन्नमयिता ॥ १२ ॥

यं वहुशोनागसमजमुच्चैर्वाजिव्रजं प्रजा दधतम् ।
ज्ञातनयं स्फुरदङ्गं मातानयदेत्य कोशलाभाच्च ॥ १३ ॥

यमित्यादि । बहुशो बहुधा यं राघवं अनागसं पापापराधरहितं(तां) अजं अजन्मानं उच्चैः वाजिव्रजं गरुड़गामिनं इति पदद्वये वासुदेवावतीर्णमिति भावः । प्रजा लोकान् दधतं तनयं पुत्रं ज्ञात्वा विज्ञाय पुरुषातिशयत्वमस्य विदुषी माता जननी कोश(ष)ला नाम एत्य उपसृत्य अङ्कमनयत्(तम्) अङ्कमित्यर्थात् क्रोड़ं, स्फुरत् हर्षोपचीयमानमित्यङ्गविशेषणं । अतएवाभा[2]च शोभितवत्यपि । यद्वा यत्र एत्य प्राप्य कोशला नाम पुरी अभात्[2] ।

अन्यच्च यं रामपालं बहुशो बहुसंख्यं नागसमजं हस्तिघटां उच्चैर्महान्तं वाजिव्रजं अश्वसेनां प्रजाः पदातिसेनां दधतं ज्ञातनयं विदितनीतिं(तं) स्फुरदङ्गं उपचितराज्याङ्गं मा लक्ष्मीः एत्य कोशलाभाच्च भाण्डागारलाभेनापि अतानयत् विस्तारितवती ॥ १३ ॥

भर्त्ता नाकस्य तरस्तत् विश्वविरोधिभूभृतां भिन्दन् ।
दानव्यग्रकरार्पितकुशतिलतोयोयमवलारिः ॥ १४ ॥

भर्त्तेत्यादिविरोधालङ्कारः । नाकस्य स्वर्गस्य भर्त्ता । भूभृतां पर्व्वतानां तत् जगविरोधि तरो वेगं पचच्छेदात् भिन्दन् । दानवीनां दानववधूनां अग्रहस्तेऽर्पितानि कुशतिल[तो]यानि येन वैधव्यं तासां कृतम् । एवमिन्द्रस्वरूपोऽपि अव(च)लारिः वलारिर्न भवतीति विरोधः । अविरोधे तु अकं पापे दुःखे च तस्य

१ Comm. वलेन सुरस्य । २ Comm. अभावात् ।

इयस्यापि न भर्त्ता। सर्व्वेषां वैरिभूभुजां तरो बलं भिन्दन्। दानाशक्ते करे अर्पितानि कुश[ति]लानि येन अबला असमर्था अरयो यस्येत्युभयत्रापि ॥ १४ ॥

अभिदुरकरोक्षतबलो प्यमरुत्वानप्रभूतमन्युरपि ।
योभूदगोत्रभिदपाकशास(नाश)नोपि च सुनाशीरः ॥ १५ ॥

अभिदुर इत्यादि। व्यतिरेकमु(मु)खेन विरोधः। अभिदुरकरो न वज्रहस्तः। न क्षतो हतो बल-नामा दैत्यो येन। न मरुत्वान्। न प्रभूतमन्युः प्रचुरयज्ञः। न गोत्रभित् न पाकशासन इति इन्द्ररूप-रहितोऽपि सुनाशीर इन्द्रः। अविरोधे यथा। अभिदुरा(रो) अजातशुरस्त्यागे शौर्य्ये च करा यस्य। अक्षतं बलं सामर्थ्यं सैन्यं। वाह्यमदेन हि महान्तोपि विक्षिप्यन्ते, अयन्तु न मरुत्वान् न वातु(तू)लो न विक्षिप्त इत्यर्थः। अप्रभूतः असंजातो मन्युः शोको यस्य। न गोत्रभित् कुलाघाती। अपाकं अगतपाकं शासनं यस्य यथाधर्म्मतो दण्डधारी। सुनाशीरः शोभनाग्रेरः[1] ॥ १५ ॥

जिष्णुशुचिजीवितेशकलानिधिकमलेशपवनधनदेनम् ।
यं वेधा व्यधित समाहारं किल लोकपालानाम् ॥ १६ ॥

जिष्णुरित्यादि। जिष्णुरिन्द्रः शुचिरग्निः जीवि[ते]शो यमः कलानिधिः चन्द्रः कमलस्य जलस्य ईशो वरुणः पवनो धनदः प्रसिद्धौ इनः सूर्य्यः इत्यमष्टानां लोकपालानां समाहारमेकरूपं। वेधा व्यधित घटितवान् इति निगमार्थः। पदार्थस्तु क्रमेण जयशीलो विशुद्धः प्र[ा]णिनाथः कलानां चतुष्टये निधिः कमलाया लक्ष्म्या ईशः लोकान् पुनीते धनं ददाति प्रभुः। इति कविरपि समाहारद्वन्द्वपदमेव निर्द्दिष्टवानिव ॥ १६ ॥

वदनगतभारतीकः कमलासनतां दधत् प्रजानाथः ।
विधिरिव धाता जगतो यः श्रीपतिनाभिसम्भूतः ॥ १७ ॥

वदन इत्यादि। कमलायाः श्रि(प्र)य आस(श)नमाश्रयः। श्रीपतिः पार्थिवो यो नाभिः क्षत्रियस्तस्मात् सम्भूतः विधिरिवेति श्लेषोपमा। अत्र श्रीपते र्वासुदेवस्य नाभितोऽवयवादुद्भूतः। शेषं सुगमं। उभयत्रापि समं ॥ १७ ॥

यः शङ्करो गिरीशः सर्व्वज्ञः सर्व्वमङ्गलाधारः ।
हर इव मारहरोऽधात् वृषचारी राजशेखरताम् ॥ १८ ॥

य इत्यादि। शं क्षेमः। गीर्वाक्। मङ्गलं श्रेयः। मारो दैवकृतः प्रतिपक्षकृतश्च प्रजास्वाघातः। वृषो धर्म्मः। राजा नृपतिः। हरइवेति श्लेषोपमात्र सर्व्वमङ्गला गौरी। मारः कामः। वृषो वृषभः। राजा चन्द्र इति ॥ १८॥

---

१ Fighting in front.

[1]किं वहु हरिरवतीर्णः स यशोदानन्द[योरुचिचम् ।
प्रौढारि]वारिजगदानन्दकमुद्यद्विराजि धामास्य ॥ १९ ॥

इदानीमुपसंजिहीर्षुराह । यत् यस्माद्धेतोः अस्य उभयस्य रामस्य यशः कीर्त्तिर्दानं त्यागः दया कृपा उरु महत् चित्रं अद्भुतं । दयापक्षेऽपि नपुंसकशेषेणेयम् । तथा धाम तेजः प्रौढारिवारि प्रौढान् समृद्धान् अरीन् शत्रुन् वारयति खण्डयति । जगदानन्दकं जगतामानन्दकारि । उद्यदुदञ्चत् विराजि शोभमानमिति । अतो हरिरिवावतीर्णः । स उभयोऽपि[2] । तथा हि हरेरपि धाम वपुः प्रौढारिवारिजगदानन्दकं प्रकर्षेण ऊढानि अरि चक्रं वारिजं शंखं(संख) कौमुदी गदा नन्दकः खड्गो येन धाम्ना तत्तथा । [3]विराजि वौ राजि गरुड़े उद्यत् ऊर्द्ध्वमारोहत् । अतो यशोदानन्दयो रुचित्रं यशोदा च नन्दश्च यशोदानन्दौ तयोः रुचित्रं रुचिमभिलाषं त्रायत इति रुचित्रं अभिलषितमभिलषितार्थसम्पादकञ्च तद्वपुरिति भावः ॥ १९ ॥

अस्त्री समुत्कटभुजो भीत्यातुरगाधि[4]भूपचरितश्च ।
अवहत्परतपोवनमवने रुचिमान् स लक्ष्मणोपेतः ॥ २० ॥

अस्त्रीत्यादि । स राघवः कटं शवं भुक्तं इति कटभुजो राक्षसाः । भीत्या भयेन आतुरगाधिभूपचरितः आतुरेण आविलेन गाधिभुवा गाधिपुत्रेण कौशिकेन उपचरितः उपगतः । यद्वा तुर त्वरणे इगुपधत्वात् कः । तुरेण त्वरमाणेन कौशिकेनोपगतः सन् परं दूरं तपोवनं ऋष्याश्रमं अवहत् चलितवान् । अस्त्री धनुर्द्धरः समुत्सहर्षः अवने रक्षणे रुचिमान् साभिलाषः लक्ष्मणेन भ्रात्रा उपेतः ।

अन्यत्र स रामपालः अवनेः पृथिव्याः अवनं रक्षणमवहत् । अस्त्री धन्वी । अतः समुत्कटभुजः सम्यगुत्कटो भीषणो भुजो यस्य । अतो भीत्या तुरगाधिभुवा अश्वपतिना राज्ञा उपचरितः कृतनानादानोपचारः । परंतपः शत्रुतापकारी । लक्ष्मणा नृपलक्ष्मणा कनकदण्डादिना उपेतः । अतएव रुचिमान् ॥ २० ॥

रञ्जितविश्वामित्रात् महौजसोस्य विदितास्त्रविद्यस्य ।
जगदभिरक्षादक्षा शक्तिः शरदीर्णताड़कस्याभूत् ॥ २१ ॥

रञ्जित इत्यादि । अस्य राघवस्य रञ्जितात् विश्वामित्रात् विदितास्त्रविद्यस्य विदितानि अस्त्राणि विद्ये च बलातिबले येन । अतएव महौजसः शरदीर्णताड़कस्य शरेण दीर्णा ताड़कानाम्नी राक्षसी येन (शेन) । जगदभिरक्षायां दक्षा शक्तिरभूत् ।

अन्यत्र अस्य रामपालस्य मित्रात् सूर्य्यादपि महौजसः विदितास्त्रविद्यस्य शरदीर्णताड़कस्य शरेण दीर्णाः ताड़कास्तालवृक्षा येन । जगदभिरक्षादक्षा[5] रञ्जितविश्वा रञ्जितं विश्वं जगद्यया एवंभूता शक्तिरभूत् ॥ २१ ॥

---

१ The portion bracketted has been restored from the commentary. The text repeats here the portion from ॰नन्दक to धामास्य ।

२ The commentary has हरिरवर्णतीर्णः । स उभेऽपि ।

३ Comm. has दूड़त् apparently for उद्यत् before विराजि which grammar does not require.

४ The text has तूरगाधिपभू॰ ।

५ Comm. दरक्षा ।

लोकान्तरप्रणयिणो दुर्नयभाजोऽग्रजन्मनो व्यसनात्।
पतितान्धकारवत्यनुभावादुदहारि गोतमी तेन[1] ॥ २२ ॥

लोकेत्यादि। राघवो हि अवतीर्णः। तस्य लोकान्तरं स्वर्गः तत्रत्यस्य अग्रजन्मनो ज्येष्ठभ्रातुरिन्द्रस्य व्यसनात् पतिता स्वामिशापभ्रष्टा अन्धकारप्रविष्टा गोतमी गोतमवधूरहल्या उदहारि उद्धृता।

अन्यच्च परलोकगतस्य ज्येष्ठभ्रातुर्महीपालस्य युद्धव्यसनात् मिलिता गोः पृथिव्याः तमी रात्रिः। अन्धकारवती उन्मूलिता जगदन्धकार(रः)विध्वंसात्। "अस्तमपि गोतमोदारमहस्तदनेन पुनरूढे" इत्युत्तरार्द्धपाठान्तरे गोतमो मुनिः तत् पूर्व्वसिद्धं दारमहः कलत्रोत्सव इन्द्रस्य व्यसनात् अस्तं गतमपि पुनरनेन प्रापितः। अन्यच्च गो[ः] पृथिव्याः तमोऽन्धकारं दारयतीति गोतमोदारं(रः)। अहस्तेजो अहर्दिनम्वा महीपालव्यसनादस्तं गतमपि पुनरनेन प्रापितः[2]। अनेन पुनरूढम् ॥ २२ ॥

परिकलितकुशिकनन्दनसदाश्रमसमृद्धसम्पदोरामः।
कृतताड़कोद्भवविधूननश्च वर्द्धितसुवाहुधामा च ॥ २३ ॥

परिकलितेत्यादि। परिकलितः कौशिकस्य सन् पूज्यमान आश्रमस्तेन समृद्धप्रमोदः। कृतं ताड़कासुतस्य विधूननं येन। तथाहि [3]वायव्यास्त्रव्यतिकरनिरालम्बनस्ताड़केन वर्द्धितं छेदितं सुबाहुनाम्नो राक्षसस्य धाम वपुर्येन।

अन्यच्च परिकलिता अभ्यस्ता कुशिकाः कुशी खड्गादिलोहविकारा यैर्नन्दनैः पुत्रैः राज्यपालादिभिः तेषां सदा सर्व्वदा श्रमेणास्त्रगुणनिकया समृद्धसम्पदः। कृतः सुतः (कृतं सुतं) तस्य ताड़कानां आघातकानां उद्भवस्य विधूननः चेष्टा वर्द्धितं शोभनयो र्भुजयोर्धाम तेजो येन ॥ २३ ॥

पृथुरक्षोनीकं धर्म्मविप्लवं विप्रहर्षकोर्य्यात्सः।
[4]सत्कृताध्वरोहितजगद्दधद्वलयितज्याकोदण्डम् ॥ २४ ॥

पृथु इत्यादि। स राघवः वलयित[ज्या]कोदण्डं वलयितमौर्व्वीकं कोदण्डं दधत् रक्षोनीकं राक्षससैन्यं पृथु महत्। धर्म्मं विप्लव इति धर्म्मविप्लवं अर्यात् संचिप्तवान्। अतएव विप्रहर्षकः विप्रान् ऋत्विजो हर्षितवान् सत्कृताध्वरः सत्कृतो यथाविधि सम्पादितोऽध्वरो येन। हितजगत् हितं भूतं जगत् येन।

अन्यच्च स रामपालः दण्डं दधत् धर्म्मविप्लवं अनीकमलक्ष्मीकं अपवान्। पृथुरक्षः महती रक्षा यस्य। विप्रह(क)र्षकः विगतप्रह(क)र्षः जितारिषड्वर्गत्वात्। सत्कृताध्वरोहि[त]जगत् सद्भिः कृतसन्धानं कृतेऽध्वनि वा रोहितं आरोहितं जगत् येन। वलयितज्यकः वलयिता वेष्टिता अवगूरिता यद्दा सामन्तचक्रोपक्रममेव चक्रावर्त्तेन पर्य्यटिता ज्या पृथ्वी येन ॥ २४ ॥

---

१ There is another reading अस्तमपि गोतमोदारमहस्तदनेन पुनरूढे।

२ पुनरनेन प्रापितः is not needed here. It appears that the scribe simply repeated what he wrote a little before.

३ Comm. वायव्याकास्त्र।

४ Text has स तु सत्कृता० ; स तु is superfluous.

इति तेन कौशिकीया क्रिया व्यधायि दधती बुधानमृतैः ।
प्रैष्यसुमित्रापत्या क्षिप्तविपक्षेष्टभूमिरक्षेण ॥ २५ ॥

इतीत्यादि । तेन राघवेण इष्ट[भू]मिरक्षेण यज्ञभूमिरक्षकेण कौशिकीया कौशिकस्य क्रिया यागः । बुधान् देवान् अमृतै र्यज्ञशेषैः दधती प्रैष्यसुमित्रापत्या प्रैष्यः परिचारकः सुमित्रायाः अपत्यं लक्ष्मणो यस्यां क्षिप्तविपक्षा क्षिप्ता· विपक्षा राक्षसा यस्यां सा व्यधायि (व्यवधायि) निर्वर्त्तिता ।

अन्यत्र । रामपालेन पत्या स्वामिना इष्टभूमिरक्षेण इष्टानां मित्राणां राज्यं भूमिं रक्षता । (क्रियासत्)[१] बुधा(द्बु)न् पण्डितान् अमृतैरयाचितैर्दानै र्दधती प्रैष्यसुमित्रा प्रैष्याणि शोभनानि अशठानि मित्राणि राजानो यस्यां सा व्यधायि । कौशिकेन इन्द्रेणापि इयं क्रिया क्रियते इति कौशिकीयेति विशेषणं तथाहि इन्द्रेण पत्या अपेक्षितपृथ्वीपालेन बुधान् देवान् अमृतैर्दधती प्रैष्यसुमित्रा क्षिप्तविपक्षा क्रिया क्रियते इति ॥ २५ ॥

भीमज्याभृज्जीवाकर्षणकण्डूयमानभुजकाण्डः ।
कौशिकसेनोऽयं जनपदान् विदेहानवाप्य मुदमूहे ॥ २६ ॥

भीमेत्यादि । अयं राघवः भीमस्य हरस्य ज्याभृद्धनुस्तस्य जीवा गुणः तस्याकर्षणाय कण्डूयमान-भुजः सेनः सप्रभुः सनाथः कौशिकनाथः ।

अन्यत्र अयं रामपालः भीमनामा ज्याभृद्भूमिपतिः तस्य जीविताकर्षणाय कण्डूलभुजः । कुशी खड्गादि[:] तया जयद्भिः कौशिकैः सेना यस्य कौशिका एव सेना यस्य अथवा इन्द्रसेना एव सेना यस्य । विद[ा] ज्ञानेन ईहान् चेष्टमानान् विमृश्यकारिण इत्यर्थः ॥ २६ ॥

अपि चापदण्डमरमप्रतिमद्रविणोऽवधूतनिखिलन्टपम् ।
स भवस्यावितजनकः करपल्लवलीलयालावीत् ॥ २७ ॥

अपीत्यादि । अपि समुच्चये । स राघवः भवस्य हरस्य चापदण्डम् धनुर्दण्डम् अवधूतनिखिलनृपं अ(आ)रं अविलम्बित[] करपल्लवलीलया अलावीत् । अतएवा[प्रतिम]द्रविणः अतुल्यबलः अवितजनकः प्रीणितसीरध्वजः ।

अन्यत्र । अपि समुच्चये । स रामपालो भवस्य संसारस्यापदं विपदं डमरमुपप्लवं शत्रुकृतमलावीत् । वि[प]त्पक्षे अप्रतिमद्रविणं संसारविप्लवनात् अप्रतिमं द्रविणं धनं यस्य, अविताः प्री(प्र)णिताः जनाः प्रजा येन करपल्लवलीलयाभीष्टदानेन । डमरपक्षे द्रविणं धनं, अविता रक्षिता प्रजा येन करपल्लवलीलया आयुधचेष्टया अवधूतनिखिलनृपं यथा भवति ॥ २७ ॥

---

१ Seems unnecessary.

अनुजः सुरपालस्य क्षममयमुद्वहत् जानकीं लक्ष्मीम् ।
समहास्तत्सूनूनाञ्च तत्त्वसारोऽभवँल्ललितजन्यः ॥ २८ ॥

अन्वित्यादि । अयं राघवः सुरपालस्य इन्द्रस्यानुजो हरिर्जानकीं सीतां लक्ष्मीमवतीर्णां उद्वहत् । तत्सूनूनाञ्च राघवकनिष्ठानामपि त्रयाणां तत्त्वसारः सीताभगिन्यः समहा विवाहोत्सवसहिता ललित-जन्यः प्रियबध्वोऽभवन् ।

अन्यत्र । अयं रामपालः सुरपालस्यानुजो जनकस्य पितुर्लक्ष्मीं ऊढवान । तत्सूनूनां च रामपाल-पुत्राणां अपि तत्त्वसारस्तस्य पालस्यैव स्वीयाङ्कितकं सारो बलं समहाः सतेजाः ललितजन्य ईप्सितयुद्धोऽ-भवत् । सामर्थ्येन पितृतुल्यास्ते बभूवुरिति भावः ॥ २८ ॥

हत्वा राजप्रवरं [भूयो] भूमण्डलं गृहीतवतः ।
स निरास्थदस्त्रकलया सहस्रदोर्व्विद्विषः स्वास्थ्यम् ॥ २९ ॥

हत्वेत्यादि । स राघवः राजप्रवरं [क्ष]त्रियसन्तानं हत्वा भूयः पुनः पुनरेकविंशतिवारान् भूमण्डलं गृहीतवतः सहस्रदोर्व्विद्विषः (षयः) कार्त्तवीर्य्यारातेः परशुरामस्य स्वास्थ्यं स्वर्गस्थितिमस्त्र(त्र)कलया निरास्थत् ।

अन्यत्र स रामपालोऽस्त्रकलया सहस्रदोः सहस्रबाहुः राजप्रवरं नृपतिश्रेष्ठं महीपालं हत्वा भूयः प्रचुरं भूमण्डलं गृहीतवतः द्विषः शत्रोः कैवर्त्तस्य नृपस्य स्वास्थ्यं अस्मिन् पक्षे शरिपरे (शरीरे) स्वरिलोपः[१] सौष्ठवं निरास्थत् ॥ २९ ॥

दुर्ज्जननीकारपरोऽप्यनुपालितसज्जनीकृतश्रीकः ।
शूरतमसूनुसहितोऽसाववहद्दण्डकारण्यम् ॥ ३० ॥

दुरित्यादि । असौ राघवः दुर्ज्जननी निन्दिता माता कैकेयी तस्याः कारो नियमः भरत-राज्याभिषेकादिः तत्परः । अनुपालितसज्जनीकृतश्रीकः अनुपालिता प्रतीक्षिता सती साध्वी जनी जाया सीता तया कृता श्रीः शोभा यस्य । सूनूः कनीयान् भ्राता लक्ष्मणः दण्डकारण्यं प्रसिद्धं अवहत् चलितवान् ।

अन्यच्च असौ रामपालः दण्डकारण्यं दण्डस्योपाय[स्य]कारण्यं करणत्वं साधकतमत्व म[व]हत् । अतएव दुर्ज्जनानां दुष्टजनानां नीकारे भर्त्सने तत्परः । यद्वा दुर्ज्जनानां नीकारस्य साध्यस्य परः परः शत्रुः शातयिता । अनुपालितसज्जनीकृतश्रीकः अनुपालिता सज्जना यया करणभूतया सा अभूतत(स)द्भावात् अनुपालितसज्जनीकृता श्रीर्लक्ष्मी र्येन । सूनुः पुत्रः ।

इदानीं कुलकं, श्लोकाष्टकेन सीता रावणेन हृतेति वर्ण्यते । तदत्र कीदृशि समये, कस्मिन् सन्निवेशे कतरेण प्रकारेण हृतेति कथाक्रमेणाह ॥ ३० ॥

[१] This grammatical rule seems to have been used to explain the other meaning of the word स्वास्थ्य ।

प्रथममुपरते पितरि महीपाले भ्रातरि क्ष्माभारम्।
विभ्रत्यनीतिका[रंभ]रते रामाधिकारितां दधति ॥ ३१ ॥

प्रथममित्यादि। प्रथमं दण्डकारण्यगम[न]काले राघवस्य शोकात् पितरि महीपाले पृथ्वीपतौ दशरथ उपरते सति भ्रातरि भरते क्ष्माभारं पृथ्वीभारं अनीतिकारं अविद्यमान ईतिकार उपप्लवकारो यत्र तं विभ्रति सति। रामाधिकारितां रामस्य सिंहासनारोपि[त]तत्पादुकाद्वयरूपेण अधिकारितां दध(धा)ति।

तथा रामपालपक्षेप्यनेन कुलकश्लेषश्लोकाष्टकेन वरेन्द्री दिव्योकेन गृहीतेति व्याहरिष्यते। ननु च राज्यभारं विभ्राणस्य असीमशौर्य्यशालिनो रामपालस्य परेण भूमिरादीयत इति जीवतो[१] व्याघ्रस्य दंष्ट्राङ्कुरोत्पाटनोत्साहसाहसिक्यमिदं कथङ्कारं आरम्भगोचरं इति शङ्कां निराचिकीर्षुः पूर्व्वकथामवतारयन्नाह।

प्रथममित्यादि। प्रथमं पूर्व्वं पितरि विग्रहपाल उपरते सति महीपाले भ्रातरि क्ष्माभारं भूभारं विभ्रति सति अनीतिकारंभरते अनीतिके नीतिविरुद्धे आरम्भे उद्यमे रते सति महीपालः षाड्गुण्यशास्त्रस्य मन्त्रिणो गुणितमवगणयन् उपष्टम्भारभटीमात्रादीषत्ग्रहणेन मिलित[ा]नन्तसामन्तचक्रचतुरचतुरङ्गबलबलयितबहलमदकलकरितुरगतरणिचरणचारुभटचमूसम्भारसंरम्भनिर्भरभयभीत(भिर)रिक्तमुक्तकुन्तलपलायमानविकलसकलसैन्येन स्वतः जयातिशयमासेदुषा सह सहसैव बलद्विपर्य्ययकोटिकष्टतरसमरमारभ्य निरमज्जत। रामाधिकारितां रामपालस्य तस्मिन् समये निगड़बद्धस्य आधिक्यानसौ यथा तत्करणशीलतां दधति एतदग्रे स्फुटयिष्यति ॥ ३१ ॥

रामेतु चित्रकूटं विकटोपलपटलकुट्टिमकठोरम्।
भूमीभृतमापनिते तपस्विनि महाशयेऽसहने ॥ ३२ ॥

[२]राम इत्यादि। चित्रकूटं भूमिभृतं पर्व्वतं तपस्विनि गृहीतवानप्रस्थव्रते।

अन्यत्र। चित्रकूटं अद्भुतमाद्यं शिलाकुट्टिमवत् कर्कशं भूभृतं(त) महीपालं तपस्विनि अनुकम्पार्हलदशापन्ने ॥ ३२ ॥

अपरभ्रात्राधिवसति कष्टागारं(र) महावनं घोरम्।
हतविधिवशेन वायसकुशीलताभेद्यकुचजानौ ॥ ३३ ॥

अपरेत्यादि। अपरेण भ्रात्रा लक्ष्मणेन सह कष्टं कृच्छ्रं महावनं महारण्यं अधि[व]सति सति दुर्दैववशेन वाय(यय)सस्य काकस्य कुत्सितशीलतया दुश्चेष्टया [भेद्यौ] द्वौ विदीर्णौ कुचौ यस्याः सा तादृशी जा(या)या यस्य।

अन्यत्र। अपरेण भ्रात्रा (ता) सुरपालेन सह कष्टागारं कारागृहं महदवनं रक्षणं यत्र दुर्दैवाधीने नवा नूतनायसी लोहसम्बन्धि[नी] कुशी निगड़रूपा सा लतेव जंघातरुविदूरवेष्टनात् तथा भेदिनी विदीर्णे अकुचे अंसकोटनी जानुनी अष्ठीवती यस्य ॥ ३३ ॥

---

१ Comm. जीवित। २ Comm. रामपाल।

शिष्टारिष्टैकदृशि विराधकबन्धापदञ्च दधमाने ।
दक्षिणका[ष्ठा]श्रिति गतपञ्चवटीसन्निवेशे च ॥ ३४ ॥

शिष्टेत्यादि । शिष्टा शेषीकृता अरिष्टस्य काकस्य तस्यैव एका दृष्टिर्येन विराधो (रोधि) नाम राक्षसः कबन्धश्च तयोरापदं मृत्युं दक्षिणामगस्त्यचरितां काष्ठां दिशं(सं) श्रितवति गतः प्राप्तः पञ्चवटी(टो)नामाश्रमः येन।

अन्यत्र । शिष्टा अनुशिष्टा अरिष्टैकदृशोऽशुभैकदृष्ट्यो दारुणकर्म्माणो यस्मै विराधिकां कदर्थयित्रीं बन्धापदं बन्धनविपत्तिं दक्षिणानां सरलानां काष्ठां उत्कर्षं आश्रितेऽतिक्रान्तः पञ्चानामपि वराटानां स(श)न्मावेशो यस्य ॥ ३४ ॥

विशास्यतयास्तवति बहुस्वपलादिस्वसारं च ।
खरनिग्रहं दधाने विदधाने दूषणत्रिकोच्छेदम् ॥ ३५ ॥

विशेत्यादि । विशास्यतया विगतनासिकामुखतया लक्षितां बहुस्वां बहुसुजन्मनां पलादिनो राक्षसस्य रावणस्य स्वसारं भगिनीं शूर्पनखां अस्तवति निराकृतवति खरनाम्नो राक्षसस्य निग्रहं वधं दूषण-नामा राक्षसः त्रिकः त्रिशिराश्च राक्षसः तयोरुच्छेदं विनाशं ।

अन्यत्र विशास्यतया विगतभक्ष्यतया स्वस्यात्मनः पलादि मांसशोणितादिकं स्वस्य सारं सामर्थ्यञ्च बहु यथाभवति तथास्तवति । खरो दुःसहः निग्रहोऽपकारः भक्तनिषेधादिकं दूषणत्रिकं ते दोषास्त्रयो रागद्वेषमोहा यद्वा का[यिकवा]चिकमानसाः तदुच्छेदः तत्परिहाणं ॥ ३५ ॥

विजनस्थानव्यूहे भूतनयात्राणयुक्तदायादे ।
विद्युद्विलासचञ्चलमायामृगतृष्णयान्तरिते ॥ ३६ ॥

विजन इत्यादि । विच्यु(?)तो जनस्थान इति ख्यातनाम्नि सन्निवेशे स्थितो रावणव्यूहो येन । भूतनयायाः सीतायास्त्राणे युक्तो दायादो भ्राता लक्ष्मणो येन । मायामृगः कनकमृगरूपो मारीचस्तस्य तृष्णया लुब्धत्वेन अन्तरिते व्यवधानहिते राघवे सति ।

अन्यत्र विजने स्थानमवस्थानं तेन व्यूहो विगत ऊहो यस्य तस्मिन् रामपाले भूतं सत्यं नयो नीतं तयोर(रर)क्षणे युक्तः प्रसक्तो दायादो महीपालो यस्य माया लक्ष्म्या मृगतृष्णया ममायं लक्ष्मीं ग्रहीष्यतीति मुग्धतया अन्तरिते तिरोहिते भूमीगृहादिगुप्तक्षिप्ते रामपाले सति ॥ ३६ ॥

मायिध्व(ध)निना शङ्कितविप(पा)दो भर्त्तुर्भुवः प्रभूतायाः ।
निकृतिप्रयुक्तितो रक्षितरि कनिष्ठे तथापन्ने ॥ ३७ ॥

मायीत्यादि । मायिनो मारीचस्य ध्वनिना लक्ष्मण त्रायस्वेत्यार्त्तनादेन भर्त्तुः रामस्य शङ्किता विपद्यया तस्याः शङ्कितविपदः भुवः पृथ्वीतः प्रभूता[याः] सीतायाः निकृतिप्रयुक्तितः भर्त्सन(नः)प्रयोगतः [1]अनक्षरेण कनिष्ठे लक्ष्मणे रक्षितरि रक्षार्थं स्थापिते । तथा तेनाकारेण तामेव दिशं प्रपन्ने गते सति ।

---

[1] Seems superfluous.

अन्यत्र मायिनां खलानां ध्वनिना अयं रामपालः क्षमोऽधिकारी सर्व्वसम्मतः ततश्च देवस्य राज्यं ग्रहीष्यतीति सूचनया शङ्कितविपदः मामसौ हनिष्यतीति शङ्किता त्रिपद्येन तस्य भुवोभर्त्तुर्महीपालस्य प्रभूताया बहुतराया निराकृतिप्रयुक्तितः शाठ्यप्रयोगात् उपायवधचेष्टया तथा लनाकारेनापन्ने दुर्गते कनिष्ठे भ्रातरि रामपाले रचितरि भाव्यर्थे ॥ ३७॥

मांसभुजोच्चैर्दशकेन जनकभू दस्युनोपधिव्रतिना ।

दिव्याह्वयेन सीता वासालंकृतिर(रा)हारि कान्तास्य ॥ ३८ ॥ कुलकम् ।

मांसेत्यादि । अस्य राघवस्य कान्ता प्रिया जनकभूर्जनकसुता दिव्या दिव्यनायिकाह्वयेन नाम्ना सीता रामस्य गृहस्यालंकृतिः मांसभुजा राक्षसेनोच्चैः महता दशकेन दशशिरसा रावणेन दस्युना चौरेणोपधिव्रतिना कैतवतपस्विना अहारि हृता ।

अन्यत्र । अस्य रामपालस्य जनकभूः पैत्र(पत्य)भूमिर्वरेन्द्री सीतावासालङ्कृतिः लाङ्गलपद्धतिवसत्यलंकारा चावाससंपन्नेत्यर्थः । अतएव कान्ता कमनीया दिव्याह्वयेन दिव्यनाम्ना दिव्वोकेन मांस(श)भुजा लक्ष्म्या अंश(स)भुज्ज्ञानेन भृत्येनोच्चैर्दशकेन उच्चैर्महती दशा अवस्था यस्य अत्युच्छ्रितेनेत्यर्थः दस्यु(श्यु)ना शत्रुणा तद्भावापन्नत्वात् अवश्यकर्त्तव्यतया आरब्धं कर्म व्रतं छद्मनि व्रती । यद्वा आचारक्विप् हेतुमण्णिज-(य)न्ताण्णिनि अहारि गृहीता ॥ ३८ ॥

त्रस्तानुजतनुजस्य च भीमस्य वि[व]रप्रहरकृतः ।

साभिख्यया वरेन्द्री क्रियाक्षमस्य खलु रक्षणीयाभूत् ॥ ३९ ॥

त्रस्येत्यादि । सा सीता अभिख्यया शोभया वरा श्रेष्ठा, अस्य रावणस्य, त्रस्ता अनुजाश्च तनुजाश्च यस्य भयङ्करस्य विवरस्य जटायुषः प्रहारं कृतवतः । अमुं प्रहृत्य सीतां असौ नीतवान् । इन्द्रीक्रियाक्षमस्य अनिन्द्रं इन्द्रं कर्त्तुं क्षमस्य रक्षणीयाभूत्, न पुनरुपभोग्या ।

अन्यत्र सा भूमिः अभिख्यया नाम्ना वरेन्द्री त्रस्ता अस्य दिव्वोकस्य यो अनुजो रुद्रोकः तदीयतनयस्य भीमनाम्नः रभ्रप्रहारिणः क्रियाक्षमस्य अलंकर्म्मीणस्य यथोक्तक्रमेण रक्षणीयाभूत् । स तत्र भूपतिः वर्त्तमानः ॥ ३९ ॥

स विनाशितमारीचोपगतेऽष्टतमो भुजौ दधद्विकलौ[१] ।

धाम निजं परिकलयांचकार शून्यं सहानुरथ रामः ॥ ४० ॥

स इत्यादि । इदानीं रामस्य चेष्टां प्रकटयति स राघवः विनाशितमारीचः अपगतप्रियतमः अतएव हि विफलौ भुजौ दधत् (तः) लक्ष्मणसहितः । निजं धाम पर्णशालां शून्यं परिकलितवान् ।

अन्यत्र । अतिशयेन विनाशी विनाशितमः अरिर्याभ्यां ययोर्वा तौ च समुच्चये भुजौ विपक्षाक्षिप्त-

१ Text विकलौ but Comm. विफलौ ।

भुज्यमानभूमिलात् विफलौ दधत्। उपगता इष्टतमा मित्राणि माहवन्धवो यस्य, ममुतः, धाम गौर्व्यं स्वं शून्यं मिथ्या कलितवान् ॥ ४० ॥

अपि चेष्टया विमुक्तः क्षमया गुरुमन्युदहनदीप्तोऽयं(सं)।
अवनीपतितां तनुमपि न तदा सम्भावयामास ॥ ४१ ॥

अपीत्यादि। अपि समुच्चये स राघवः गुरुमन्युवह्निदीप्तः क्षमया सहिष्णुतया चेष्टया सह विमुक्तः निश्चेष्टो मूर्च्छितः सन् अवनीपतितां तनुं देहं न सम्भावितवान्।

अन्यत्र अपि समुच्चये क्षमया भूम्या इष्टया विमुक्तः अवनीपतितां पृथ्वीपतितां तनुं अल्पमपि न सम्भावितवान् ॥ ४१ ॥

सख्या सह विपदुदये न विनयविधिना सूनुना यत्नात्।
कृतपरमोहापोहोऽलब्ध स्थिरसम्बिदुत्थानम् ॥ ४२ ॥

सख्येत्यादि। राघवः सूनुना कनिष्ठभ्रात्रा सख्या द्वितीयेन यत्नतः पानीयसेचनव्यजनादिना कृतः परस्यातिशयस्य मोहस्य अपोहः खण्डनं यस्य अतः स्थिरसम्बित् स्थिरचेतनः उत्थानं अलब्ध लब्धवान् उत्थित इत्यर्थः।

अन्यत्र। सख्या अमात्येन सूनुना सुतेन च सह कृतौ परमौ महान्तौ ऊहापोहौ इदं कर्त्तव्यं इदं न कर्त्तव्यम् इत्यादिकौ येन स्थिरतत[1] स्थिरसम्बित् (तः) कृतनिश्चयः उत्थानं उद्यमं लब्धवान् ॥ ४२ ॥

विविधविशालव्यालाटविकाकीर्णावनिर्बह्वुर्व्वीभृत्।
इष्टार्थाभिनिविष्टेन ततस्तेनाटि कष्टेन ॥ ४३ ॥

विविधेत्यादि। तेन इष्टा प्रिया सीता तदर्थाभिनिविष्टेन अवनिः विविधा विशाला व्याला हिंस्र-पशुसर्पराक्षसादयो यस्यां तयाटविकया आकीर्णा बहुपर्व्वता अ[ा]टि पर्य्यटिता।

अन्यत्र। रामपाले[न] सामन्तचक्रं प्रणिनीषुणा पृथ्वी पर्य्यटिता। तत्र व्याला आग्रहारिका वैषयिका आटविका अटवीयसामन्ताः उर्व्वीभृद्राजा। इष्टार्थोऽभिलषितार्थः ॥ ४३ ॥

अन्वयभवनं सहसामन्तव्रजमभ्युपेतसाहाय्यं।
अनुमेने स महाद्रो रवितनयं मित्रभावमापन्नम् ॥ ४४ ॥

अन्वय इत्यादि। स महाद्रोर्महाबाहुः रवितनयं सुग्रीवं सहसां बलानां अन्वयभवनं कुलगृह अन्त(स्त)व्रजं समीपमागतं मित्रभावाभ्यर्थनया प्रपन्नमनुमेने।

अन्यत्र सह सम्बद्धार्थं सामन्तव्रजं वक्ष्यमाणनायकं अन्वयस्याभ्युदयस्य भवनं अवितनयं गूढ़(ढ़ा)नीतिं मित्रकोटिप्रविष्टं स रामपालोऽनुमेने ॥ ४४ ॥

---

[1] Seems superfluous.

देवेनभुवो विपुलद्रविणस्यच [1]दानतः सुखाचक्रे ।
अमुना हरिनागपदातिलब्धवहलप्रभावोऽसौ ॥ ४५ ॥

देवेनेत्यादि । अमुना सुग्रीवः देवेनभुवः इन्द्रभुवः वालिनो विपुलबलस्य च दानतश्छेदात् हरिनागस्य वानरनायकस्य पदे राज्येऽतिशयेन लब्धः पुनरस्खलनात् वहलप्रभावो येन तथा सन् सुखाचक्रे अनुकूलितः ।

अन्यच । अमुना देवेन राज्ञाऽसौ सामन्तव्रजः हरयोऽश्वा नागा हस्तिनः पदातयः एभिर्लब्धो वहलः प्रभावो येन स ताटकभुवो भूमेर्विपुलस्य धनस्य च दानतस्त्यागात् अनुकूलितः ॥ ४५ ॥

अथ तरसाशिवराजेनास्य हितान्वेषिणाज्ञया भर्त्तुः ।
आशुगजेन वलवता वाजिवरख्यातधाम्ना च ॥ ४६ ॥
खरगुरुचारणविक्रमदीर्णमहेन्द्रेण केशरिसुतेन ।
[2]उद[ल]ङ्घि महातटिनी शोभान्वीतेन दुस्तरमहोर्म्मिः ॥ ४७ ॥ युग्मम् ।

अथेत्यादि । अग्रिमश्लोकेन सह कुलकमतस्तेनैव योजयिष्यते । खरेत्यादिपूर्व्वश्लोकेन समं कुलकं । अथानन्तरं केशरिणो वानरवरस्य पुत्रेण क्षेत्रजेनाशुगात् पवनात् जातेन हनूमता तरसाशिनां रक्षसां वरान् श्रेष्ठान् अजता क्षिपता । भर्त्तुः सुग्रीवस्याज्ञया अस्य राघवस्य हितान्वेषिणा प्रियान्वेषिणा बलवता महाबलेन वाजिवरख्यातधाम्ना पक्षिशेखरेण संपातिना इयं सा समुद्रपारेऽशोकवनिकायामेव सा सीता प्रतिवसतीति ख्यातं(नं) कथितं धाम स्थानं यस्य खरो दुःसहो गुरुर्म्महान् चारणस्चरणभवो विक्रमो विमर्द्दस्तेन विदीर्णो विदारितो महेन्द्रनामा पर्व्वतो येन । भया(भा) दीप्त्या अन्वीतेन यद्वा उद्गमाल्लाङ्गूलं इतेन तटिनीशो महाजलनिधिः दुस्तरमहोर्म्मिः उदलङ्घि ।

अन्यच तरसाबलेन शिवराजेन शिवराजनाम्ना महाप्रतीहारेण राष्ट्रकूटमाणिक्येन अस्य रामपालस्य भर्त्तुराज्ञया हितैषिणा आशु शीघ्रं गजेन बलवता सैन्यवता तुरङ्गपुङ्गवैः ख्यातं शौर्य्यं यस्य । खरगुः तीक्ष्ण-रश्मिस्तस्येव रुग् दीप्तिर्यस्य सूर्य्यवत्तेजस्विनेत्यर्थः ॥ रणो युद्धं तत्रत्यविक्रमेण दीर्णः भीतः इन्द्रो यस्मात् केशरिकिशोरसदृशेन शोभान्वीतेन पश्चाङ्गप्रसादालङ्कारेण महातटिनी गङ्गा लंघिता ॥ ४७ ॥

आपन्नभीमरक्षा विषयग्रामाकुलत्वदुस्था या ।
त्रस्तानुसृतावसुमत्यमुना सीतेनतेजसाभाजि ॥ ४८ ॥

आपन्न इत्यादि । अमुना हनूमता इनतेजसा सूर्य्यतेज इव तेजो यस्य । अनुसृतौ सत्यां अनुसारेण सीता आपन्नभीमरक्षा प्राप्तानि भीमानि रक्षांसि यां आपन्ना भीमानि रक्षांसि या वा । अतएव त्रस्ता (दस्ता) रूपादिविषयग्रामाकुलतया दुस्था असु(सु)मती जीवितमात्रशेषा अभाजि सेवाञ्जलिना बोधिता ।

---

१ Text has दतः ।    २ Text has उदयिं माहातटिणी ।

अन्यच्च अमुना शिवराजेनासीतेनासितेन तेजसा खड्गदर्पेण सा वसुमती भूमिर्वरेन्द्री आपन्ना व्यस्ता भीमस्य रक्षा यस्यां अतो विषयाणां च ग्रामाणाञ्चाकुलतया दुःस्था त्रस्ता देवब्राह्मणादिभूमिरक्षा-निमित्तं कोऽयं विषयः, क एष ग्रामः, कस्य भुक्तिरियमिति प्रश्नपुरःसरं अनुसृता सती अभाजि भग्ना ॥ ४८ ॥

तस्यामाश्वस्तायां सन्दिष्टेन सह रक्षकव्यूहैः।
भग्नं परितोवनमुषितालङ्का नामचास्य पूर्द्विषतः॥ ४९ ॥

तस्यामित्यादि। संदिष्टेन संदेशेनांगुरीयकादिना करणभूतेन तस्यां सीतायामाश्वस्तायामाश्वास-युक्तायां सत्यां अमुना हनूमता अ[ा]हारविहारव्यपदेशेन तस्य द्विषो रावणस्य वनं क्रीड़ावनं परितः सर्व्वतः रक्षार्थनियुक्तराक्षसव्यूहैः सह भग्नम्। तथा लङ्का नाम पूः पुरी उषिता दग्धा।

अन्यच्च अमुना शिवराजेन समादिष्टेन तस्यां वरेन्द्र्यां भीमनियुक्तरक्षकव्यूहैः सहाशु शीघ्रं अस्त[ा]यां क्षिप्तायां सत्यां तस्य द्विषो भीमस्यावनं रक्षणं सर्व्वतो भग्नं अतः का नाम पूः पुरी अलं यथेष्टमुषिता वसतिं गता अपि तु न कापि॥ ४९॥

इति कृत्वाग्रामागत्य चितां (ताता) भूमिं स जानकीं निजभर्त्रे।
अक्षान्तकरः प्रथिताभिज्ञोऽचकथन्मिथस्तथाभूतां दशां[१] ॥ ५० ॥

आरम्भरामो नाम प्रथमः परिच्छेदः।

इतीत्यादि। स हनूमान् अक्षनाम्नो रावणसुतस्य वधकारी प्रथिता प्रकटिता सीतासंदिष्टाऽभिज्ञा-ऽभिज्ञानं चूड़ामणि र्येन तथा सन् निजभर्त्रे राघवाय जानकीं भूमिं चितां व्याप्तां वा अत्यस्त(न्त)चेतनां तथाभूतां मिथो रहसि अचकथत्।

अन्यच्च। स शिवराजो देवोऽक्षान्तः केनापि न सोढ़ः करो हस्तो यस्य प्रथितः (ता) ख्यातोऽभिज्ञः कुशलः अभिज्ञा स्मृतिः प्रकटिता येन वा[२] तथा सन् निजभर्त्रे रामपालाय जानकीं भूमिं चितां परिचितां व्याप्तामवा तथाभूतामचकथत्॥ ५०॥

## इति रामचरितटीकायां आरम्भरामो नाम प्रथमः परिच्छेदः।

---

१ This word spoils both sense and metre.
२ There is a redundant ते after 'वा'।

द्वितीयः परिच्छेदः ।

अथ धृत्यमर्षगर्व्वोच्छलदुत्साहोऽयमुन्मिलत्पुलकः ।
रामो महानुभावो [१]रिपुनिर्ज्जयोद्यमञ्चक्रे ॥ १ ॥

अथेत्यादि । विभावादिसामग्रीपरिग्रहेण काव्यस्य वीररसप्रधानतां आतनोति । तदत्र उभयोऽपि जिगीषुर्महानायको राम इति आलम्बनविभावः । सत्त्वातिशयोदयादुदञ्चनमहापुरुषकारो हि उद्दीपनविभावः स च वैरिविजयोद्यमपदेनैवोपपादितः । पुरुषार्थसम्पा(म्प्या)दनप्रणिधानलक्षण उत्साह इति स्थायीभावः । धृत्य(त्य)मर्षगर्व्वाः व्यभिचारिणः । पुलकः सात्त्विकः, रागाद्यारम्भगम्भीरावष्टम्भोऽनुभावः इत्येवं परिपोषमासादयन्नुत्साहः स्थायी भावो वीररसत्वेन परिणत इति काव्यसर्व्वस्वभूतवीररसोल्लेखाविष्कारः यदाहुः ।

धर्म्मानुरोधशीलस्य विजिगीषोर्मनस्विनः ।
आलम्बाद् जायते यत्नः पुरुषार्थसमाप्तये ॥
स्थायी भाव उत्साहो दीप्तसत्त्वद्विजन्मना ।
महापुरुषकारेण रोमाञ्चैरथ सात्त्विकैः ॥
अथ्यमर्षेण गर्व्वेण वेगेनोग्रतया तथा ।
स्मृत्या मत्या च धृत्या च सप्तभिर्व्यभिचारिभिः ॥
रागाद्यारम्भगम्भीरावष्टम्भैरनुभावकैः ।
परिपुष्टो भवेद्वीरो दाने धर्म्मे युधि त्रिधा ॥
स्वरे विशेषलेशः पुनरग्रे निगदिष्यते ।

स्पर्शनजोत्साहात् द्विगुणितप्रभा वानरप्रवीरास्ते ।
स(सा)म(मा)हा नीलाङ्गदवलयामलिताः कुमुदमादधतः ॥ २ ॥
उरुतरसोऽनलसहिताः पृथुनारम्भेण सह रभसमेताः ।
सहतारपुष्करगजादिव(वा)लाः सांराविणं दधदुत्तालाः ॥ ३ ॥
क्रूरकरबालधीराः कुलिशसमाननखरायुधप्रकराः ।
स्फुरदृक्षपतिमुखास्तं न्यविशन्त धुरन्धरा धरोद्धरणे ॥ ४ ॥

स्पर्शनजेत्यादि । श्लोकत्रयेण कुलकं । ते वानरप्रवीराः स्पर्शनजः पवनतनयः तस्योत्साहेन द्विगुणिता प्रभा दीप्तिर्येषां समहा सोत्सवाः नीलोऽङ्गदश्च प्रसिद्धौ एतयोर्यूथपत्योर्बलञ्च एभिर्यामलिताः कुमुदो नाम कपिसेनापतिस्तं दधतः राघवं न्यविशन्त इति तृतीयेन श्लोकेन समं सम्बन्धः ।

---

१ Text रिपुविर्य्ययोद्यलम् । Comm. वैरिविजयोद्यमं ।

अन्यच्च ते नरप्रवीराः चतुर्थश्लोके वक्ष्यमाणनामानः दानजनितोत्साहद्विगुणप्रभावाः, समहानीलैरिन्द्र-नीलमणिखचितैः अङ्गदैः केयूरैः वलयैः कङ्कणैश्चामलिताः प्रोज्ज्वलिताः पृथ्वीहर्षं दधतः पूर्व्ववल्क्रियासम्बन्धः।

उरुइत्यादि। ते वानरप्रवीराः उरुतरसस्तरोबलं वेगश्च नलः प्रसिद्धस्तेन सहिताः। पृथुनाम्नः रम्भनाम्ना च वानरेण सह रभसमायाता र[भ]सनाम्ना कपिना समेताः तथा तारनाम्नः पुष्करनाम्नश्च कपेः गजादीनाञ्च गजगवयगवाक्षप्रभृतीनां कपिभटानां सह वर्त्तन्त इति सांराविणं समूहोत्थः कोलाहलः। उत्ताला उद्गतकरतालाः।

अन्यच्च ते नरप्रवीराः उरुतरसोऽनलसहिताः अनलसाः दक्षाश्च हिताश्च महता आरम्भेण सह (¹मुपगतवत्) रभसमायाताः तारैरित्युच्चैः पुष्करैः वाद्यैः सह वर्त्तन्ते गजादिबलानि येषां गजादयो हस्त्यश्वमहिषादयः उत्तालाः उदग्राः।

क्रूर इत्यादि। ते वानरवीराः क्रूरान् खरान् करान् हस्तान् बालधीन् लाङ्गूलानि इतरे क्षिपन्ति वज्रसदृशनखायुधप्रकराः। स्फुरन् ऋक्षपतिर्जाम्बवान् मुखं येषां धरोद्धरणे पर्व्वतोत्पाटने धुरन्धराः तं राघवं न्यविशन्त।

अन्यच्च। ते नरप्रवीराः क्रूरकरवालाः धीराः अकातराः वज्रसमं आननं मुखं येषां अतएव खराः तीक्ष्णाः आयुधप्रकरा येषां ऋक्षपतिश्चन्द्रः स्फुरच्चन्द्रवदनाः धराया भूमेर्वरेन्द्र्या उद्धरणे धुरन्धराः तं रामपालं न्यविशन्त ॥ ४ ॥

वन्द्यगुणसिंहविक्रमशूरशिखरभास्करप्रतापैस्तैः
समहाबलैरुपेतो जेतुं जगतीमलम्भूष्णुः ॥ ५ ॥

वन्द्य इत्यादि। तैर्हनूमत्प्रभृतिभिर्वन्दनीयशौर्य्यादिगुणैः सिंहविक्रमैः शूरशिखरैः शूराणां शिखरैरग्रै र्माणिक्यै र्वा भास्करप्रतापसदृशप्रतापैः। भास्करः सूर्य्यः प्रतापः प्रभावः।

अन्यच्च मिलितसामन्तचक्रस्य नामाङ्कनं न कृतमिति तदुल्लिखति वन्द्य इति। कान्यकुब्जराजवाजिनीगण्ठनभुजङ्गो भीमयशोऽभिधानोमगधाधिपतिः, पीठीपतिः; गुण इति नानारत्नकूटकुट्टिमविकटकोटाटवीकण्ठीरवो दक्षिणसिंहासनचक्रवर्त्ती वीरगुणो नाम; सिंह इति दण्डभुक्तिभूपतिरद्भुतप्रभावाकरकरकमलमुकुलतुलितोत्कलेशकर्णकेशरीसरिद्वल्लभकुम्भसम्भवो जयसिंहः; विक्रम इति देवग्रामप्रतिबद्धवसुधाचक्रबालबालबलभी(भि)तरङ्गवहलगलहस्तप्रशस्तहस्तविक्रमो विक्रमराजः; शूर इति अपरमन्दारमधुसूदनः समस्ताटविकासामन्तचक्रचूड़ामणि¹र्लक्ष्मीशूरः; कुजवटीयप्रतिभटकरिकूटकषणकेशरी शूरपालश्च। शिखर इति समरपरिसरविसरदरिराजराजिगण्डगर्व्वगहनदहनदावानलः तैलकम्पीयकल्पतरुद(तरुरुद्र)शिखरः। भास्कर इति खरतरकरवालल्लीलाविहणवैरिवाहिनीरुधिरप्रवाहविहितापरलोहितार्णवबलयितोच्छालभूपालो मयगल-

---

१ Seems to be unnecessary.

सिंहः प्रताप इति प्रतापसिंहः प्रतिपक्षकक्षोनिम्भद्वौहिणीदारुणद्रवणभूणविभ्रंसभीषणप्रयाणढक्कारवो डेक्करीयराजः एभिर्महाबलैरुपेतो रामपालः ॥ ५ ॥

प्राप्तप्रबर्द्धितार्ज्जुनबिजयोऽर्थितबर्द्धनः [सोमसुखश्च] ।
अनुगतमातुलसूनु-प्रबलभुजालम्बनो रामः ॥ ६ ॥

प्राप्तेत्यादिः । प्राप्तः प्रबर्द्धितार्ज्जुनस्य प्रच्छन्नकार्त्तवीर्य्यस्य भार्गवस्य विजयो येन अर्थितस्य अनुगतस्य सुग्रीवस्य बालिबधात् बर्द्धनो बर्द्धयिता । एतत्पदद्वयाविष्कारेण लङ्कापि रीषज्जय इति । प्रसन्नलात् सोमेन चन्द्रेण सदृशं जगदाह्लादकं सुखमस्येति अनुगतम[स्या]तिशयेनानुगस्य अतुलस्य सूनोर्लक्ष्मणस्य भुज आलम्बनं यस्य स तादृक् रामः ।

अन्यच्च प्राप्तो मिलितः प्रबर्द्धितो(को) देशकोषादिप्रसादेन स्फीतीकृतः अर्ज्जुन इति कयङ्गलीयमण्ड-लाधिपतिः नरसिंहार्ज्जुनः सङ्कटग्रामीयचण्डार्ज्जुनश्च विजय इति निद्रावलीयविजयराजो येन । बर्द्धन इति कौशाम्बीपतिर्द्दोरपबर्द्धनः सोम इति पदुवन्वाप्रतिबद्धमण्डलाप्रतिवल्लभः(व) सोम[ः] तन्मुखा अपरे च सामन्ताः तैः सहितोऽनुगतानां मातुलपुत्राणां राष्ट्रकूटानां वक्ष्यमाणानां भुजालम्बनं यस्य ॥ ६ ॥

अपि चण्डधामनन्दनबिरचितहरिकुञ्जरव्यूहः ।
तुमुलमतुलरणरङ्गचतुरङ्गञ्जयदरीन् बलं कलयन् ॥ ७ ॥

अपीत्यादि । चण्डधामनन्दनेन सुग्रीवेण विरचितो हरिकुञ्जराणां वानरश्रेष्ठानां व्यूहो बल-विन्यासो यस्य । चतुरं दक्षं अरीन् शत्रून् बलं कलयन् ।

अन्यच्च चण्डधामभिरुग्रप्रतापैर्नन्दनै राज्यपालादिभिर्विरचितो हरीणामश्वानां कुञ्जराणां गजानां व्यूहो यस्य चतुरङ्गं करितुरगतरणिपदातिमयं अरीन् जयत् बलं कलयन् ॥ ७ ॥

सतु [दुग्ध]सिन्धुराजमथनगोत्र[१]प्र[भवमुभयभुजदण्डं] ।
परराष्ट्रकूटसुभटजेतारमजीगणन्निजं बन्धुं ॥ ८ ॥ कुलकम् ।

स त्वित्यादि । एतेषु बहलाहङ्कारलहरिलम्भिताभूतपूर्व्वाहंपूर्व्विकारम्भरभसभरोदञ्चद्दुश्चण्डचण्डि-माड़म्बरचलरणविक्रमसमसमयमौलिलोलकेरालबालधिवलयेषु त्रिभुवनविजययोग्यसञ्जातसम्पदोपाषितेषु कौशकेशरिकिशोरनिकरेषु किङ्करेषु महत्सु सत्सु राघवः परराष्ट्रस्य लङ्कायाः कूटसुभटं रावणं जेतारं निजमुभयं भुजदण्डं महाबन्धुं अजीगणत् । पुनः किम्भूतं दुग्धमयसिन्धुराजस्य क्षीरोदस्य मथनो गोत्रः पर्व्वतोमन्दरः तस्यैव प्रभवः प्रभावो यस्य भुजदण्डस्य तं यथा मन्दरेण क्षीरोदमुन्मथ्य लक्ष्मीरमृतादिकमुद्धृतं तथा राघवः भुजदण्डेन राक्षसार्णव(न्तर)मुन्मथ्य सीतालक्ष्मीरध्वरविरोधेरविरोधात् यज्ञशेषलक्षणं अमृतं अपरापरञ्च रत्नमभ्युद्धृतमिति साधर्म्यम् ।

---

१ The text had to be restored from the commentary as in the MS. of the text we have, after the word गोत्रप्र०, a portion of the next verse. The word दुग्ध is omitted in the text.

अन्यत्र एतेषु समस्तसामन्तेषु तथाविधेषु विविधेषु विद्यमानेषु च रामपालः दुग्धसिन्धुराजमथनगोत्रप्रभवं दुग्धो निर्दुग्धो गालितगर्व्वत्वात् गृहीतबहुतरकरितुरगद्रविणपणत्वाच्च सिन्धुराजः पीठीपतिर्देवरक्षितो नाम येन तेन मथनेन मथननाम्ना महनइति प्रसिद्धाभिधानेन राष्ट्रकूटकुलतिलकेन उपलक्षितं यद्गोत्रं कुलं तत्प्रभवं तदीयनन्दनमहामाण्डलिककाह्नुरदेवसुवर्णदेवभ्रातृजमहाप्रतीहारशिवराजदेवप्रभृतिमु(म)भयभुजदण्डमुत्कृष्टराष्ट्रकूटसुभटं निजं बन्धुं मातुलसन्तानं जेतारमजगणत्। तथाहि महनेन विन्ध्यमाणिक्यं करेणुराजमारुह्य समरसीमन्यु(मु)ल्लासितशल्यशतकोटिपाटितोद्भटसुभटं शङ्कटमरट्टमन्दोत्कटकरिघटाघोटकपटलः स पीठीपतिर्मगधाधिपो निर्दुदुहे। नागाधिराजमवरुह्य समृद्धसिन्धुराजोर्म्मिजालकवलीकृतमेक एव भूपालभोग्यवसुधावलयं वराहजन्माविभुः स महनः परमुज्जहार। अपि च भुजदण्डं निजं राष्ट्रकुटसुभटं बन्धुमित्युभयं जेतारमजगणदिति यथासंख्येन सम्बन्धः तदत्र निजभुजदण्डपक्षे दुग्धेत्यादिपदं ऐक्ष्वाकुपक्षवत् योज्यम् ॥ ८ ॥

गमयन् स महासेनामेनामतिचित्रविक्रमो विभ्रत्।
शक्तिमथतारकारी रामः शुशुभेऽभ्यमित्रीणः ॥ ९ ॥

गमयन्नित्यादि। अतीवचित्रोऽद्भुतो विक्रमो यस्य शक्तिं सामर्थ्यं तारः तरणम् समुद्रे गङ्गायाञ्च इत्युभयत्रापि समम्। तारकारीराम इति। रेफलोपदीर्घत्वाभ्यां तारकारिः कार्त्तिकेय इति श्लेषोपमा। अत्र चित्रो नानावर्णविचित्रो विःपक्षी मयूरस्तेन क्रमते। शक्तिं अस्त्रविशेषं। शेषः सर्व्वत्र सम[:] ॥ ९ ॥

[1]तस्य म(मा)हावाहिन्यां गुप्तायां तरणिसम्भवेनाभूत्।
द्विषमभिसेनयतोमुखरितदिक्कोलाहलः समुत्तारः ॥ १० ॥

तस्येत्यादि। महावाहिन्यां महासेनायां तरणिसम्भवेन सुग्रीवेण गुप्तायां रक्षितायां कोलाहलः समुत्सहर्षः। तारोऽत्युच्चः अतो मुखरितदिगभूत्।

अन्यत्र महावाहिन्यां गङ्गायां तरणिसम्भवेन नौकामेलकेन गुप्तायां च्छन्ना[यां] समुत्तारः सम्यगुत्तरणं मुखरितदिक्कोलाहलो यस्मिन् ॥ १० ॥

आवासयन् स विष्वद्रीचीरुच्चैश्चमूरमूर्विरचयन्(तन्)।
उत्तरकूलं परितस्तरे तरस्वी महासिन्धोः ॥ ११ ॥

आवासयन्नित्यादि। उत्तरकूलं महासिन्धोः समुद्रस्य आवारं।

अन्यत्र गङ्गायाः तीर्णायाः पारं आच्छादितवान्।

इदानीं राघवस्य शैलश्रेणीभिः सेतुबन्धं रामपालस्य भीमेन समं समरं नवश्लोकीकुलकेन समारचयति। तत्र नवश्लोकेन राघवेणागतोरणं पर्व्वतपङ्क्तिग्रथनां सेतुबन्ध इति प्रसिद्धं रचयता समुद्रोऽबन्धि,

---

[1] The text has अथ in addition, which mars the metre.

रामपालेन रणं संग्रामं रचयता भीमो नृपतिरबन्धीति सम्बन्धः। तत्र किम्भूतम् अगतोरणं रणं वेति द्वितीयश्लोके तैर्महावीरैः आवद्धं, एकं हनूमत्प्रभृतिभिः, अपरं वन्द्यगुणप्रभृतिभिः। किम्भूतैः तैः इत्याह ॥ ११ ॥

प्रवरकरकुलिशकन्दल[1]निस्कन्दोदस्तविपुलपरगोत्रैः।
कठिनज्याधरकर्षणनीरोषितनिर्झरप्रकोष्ठतटैः ॥ १२ ॥

प्रवर(ल) इत्यादि। पराव्यवहिताः गोत्राः पर्व्वताः न पुनः सन्निहिताः समुद्रोदरवर्त्तिनः। ज्याधरः पर्व्वतः।

अन्यत्र परेषां शत्रूणां गोत्रं कुलं। ज्याधरं धनुः ॥ १२ ॥

धुतनागवलालोकावरणैराश्वाहितप्रयत्नतरैः।
सुविहित[रक्षोपायै][2]रारब्धन्तैर्महावीरैः ॥ १३ ॥

धुत इत्यादि। धुतं स्फोटितं नागबलस्य काद्रवेयकुलस्य आलोकावरणं यैः। आपातालनिमग्न-मूलानां गिरीणां उत्पाटनात् नागलोकोऽप्यवालच्यते आशु शीघ्रं आहितप्रयत्नातिशयैः। सुष्ठु विहितो रक्षसां अपायो यैः।

अन्यत्र धुतं छोटितं नागवलयस्य हस्तिघटायाः आलोकावरणं अन्धपटो यैः। आश्वं अश्वसमूहः तत्राहितप्रयत्नैः[3] संयोगेन घोटकं ठटुठकुरैः रक्षायाः उपायः गूढ़[4]प्रखरसन्नाहवाङ्गरक्षशीर्षरक्षतलीरचक पदातिपार्ष्णिरक्षाप्रकारः। किम्भूतं अगतोरणं सेतुं रणञ्च रचयता इत्याह ॥ १३ ॥

अविदूरान्दोलितभूमीनं तरसा[5]पतन्महासत्वम्।
क्षिप्तखगावलि[6]संकुलमविरलशङ्कुप्रहारञ्च ॥ १४ ॥

अवीत्यादि। अविभिः[7] पर्वतैः अब्धिकुक्षिप्रक्षिप्तै दूरमत्यर्थमान्दोलिता भूः स्थानं येषां ते तादृशा मीना मत्स्या येन सेतुना तरसा वेगेन पतन्ति महान्ति सत्त्वानि यादांसि येन खगावलिः जलचरपक्षिश्रेणी ताभिः संकुलं अविरलः शङ्कुषु यादोविशेषेषु प्रहारो यस्य।

अन्यत्र अविदूरौ सन्निहितौ परस्परान्दोलनमनसौ[8] भूमीनौ भूमीश्वरौ रामभीमौ यस्मिन् रणे तरसा आपतन्तो महासात्त्विका भटा यत्र खगावलिः वाणावलिः शङ्कुः शल्यं अस्त्रं ॥ १४ ॥

---

१ The text here inserts समुत्तारः। कन्दल which words are not in the comm., and they spoil the metre. २ रक्षोपायैः restored from the commentary. ३ Com. प्रयत्नैः।

४ The text of the comm. गुड़। ५ Text has तरसारसा which is evidently wrong.

६ Text has खगावरणैः which is evidently wrong.

७ The commentary has अचौभिः which is wrong. ८ Comm has मनोसौ।

विकटास्याडम्बरचलनक्रमकरपालिघोरसंघट्टम् ।
उल्लासितकुन्तीर्णास्कन्दितसैन्धवमहोर्म्मिभरम् ॥ १५ ॥

विकटेत्यादि । भयङ्करवक्त्राडम्बराणां (अ)चलानां नक्राणां मकराणाञ्च पालिषु पङ्क्तिषु घोरः संघट्टो विमर्द्दो यस्य सेतोः उल्लासिता गौः पृथ्वी[1] येन रावणवधोपायभूतत्वात् । तीर्णोऽमज्जनात् आस्कन्दितो यन्त्रितः सैन्धवः सामुद्रो महोर्म्मिभरो येन ।

अन्यत्र भयङ्करः असेः खड्गस्य आडम्बरः कम्पनक्रमणञ्च येषां तेषां करपालिनां खड्गिनां घोरः सङ्घट्टः खड्गमेलको यस्मिन् रणे । उल्लासितैः कुन्तिभिः कुन्तकरैः इतोऽभियुक्तः आस्कन्दितश्च सैन्धवानां घोटकानां महोर्म्मिभरः उत्प्लवगतिविशेषातिशयो यत्र । १५ ॥

विदितजितानिलरंहोहरिबलमाहतपदातिसंदोहम् ।
दलितगलद्दानजलद्विरदं निर्भिन्नबहुवीरम् ॥ १६ ॥

विदित इत्यादि । विदितं ज्ञातं जितपवनवेगानां हरीणां वानराणां बलं सामर्थ्यं यस्मिन सेतौ आहतपदानां व्याहतस्थानानां आतीनां शरालिपक्षिणां सन्दोहो येन । दलिता गलन्मदा जलहस्तिनो येन । निर्भिन्ना विवक्त वेङ्कणचिका दरा पानीयं येन ।

अन्यत्र विशेषेण दितं छिन्नं खण्डखण्डीकृतं जितपवनवेगानां हरीणां अश्वानां बल्यं सैन्यं यस्मिन् रणे । आहताः पदातिसन्दोहा यत्र दलिता गलन्मदजला द्विरदा येन ॥ १६ ॥

सह(हा)साविघटनया जीवग्राहग्राहिताहित[2]प्रवरम् ।
स्फुरदसमधामसम्पत्तिमीयमानबलसंवाध[3]म् ॥ १७ ॥

सहसेत्यादि । सहसा अविलम्बिता अविघटनया पर्व्वतसङ्घट्टेन अजीवा निर्जीवा ग्राहा जलजन्तवो येन सेतुना ग्राहितोऽहितप्रवरो राक्षसाधिपतिर्येन महाकायत्वादतुलदेहसम्पत्तिरतएव स्फुरद्भिरध्वमाय शालिभिस्तिमिभिर्महाजलजन्तुभेदैरीयमाणो गम्यमानः वलस्य सामर्थ्यस्य सम्यक् बाधो यस्मात् ते हि तिमयः प्रथमतः स्वप्रमाणसौटीर्य्यपर्य्युत्सुकाः समीपमभ्ययुस्त[त]स्तेऽपि कपिसुभटभुजदण्डदम्भोलिलीलोत्खातक्षिप्तगुरु-तरुगिरिप्राग्भारभग्नग्रीवाकाण्डतुण्डमुण्डा[:] चूर्णपेषमपिष्य(स)न्त ।

अन्यत्र सहसा बलेन विधिविघटनया जीवग्राहं गृहीतोऽहितवरो भीमो येन रणे मीयमानं हन्यमानमपि यद्बलं सैन्यं (सैन्यं) अतुलतेजःसम्पत्ति अतएव स्फुरत् तेन बलेन सम्बाधं सङ्कीर्णं प्रतियोधैः वध्यमाना अपि केऽपि तत्र न किमपि कातर्य्यं भेजुः ॥ १७ ॥

१ This should be कुः पृथ्वी ।
२ The text has ॰ग्राहिताहिताहित॰ ।
३ The text has बाम्रं वाधाम् ।

[1]संक्षुब्धं च पर्व्वताघातविघट्टितशंखकन्धरम् ।
शैलास्फालसमुच्छलन्नाटितकबन्धकीलालम् ॥ १८ ॥

सक्षुब्धमित्यादि । शङ्खः कम्बुः कन्धरो मेघः ते हि जलजिघृक्षया समुद्रमासेदिवांसः पर्व्वताघातेन विघट्टिताः । शैलास्फालसमुच्छलत् । कल्लोलकवलितदिक्चक्रवालतया नाटितं विकटकबन्धं पानीयं येन कीलालं पानीयम् ।

अन्यच्च रणे शङ्खो ललाटास्थि कन्धरो ग्रीवा कं शिरः कबन्धश्छिन्नमस्तकः कायः कीलालं रक्तं ॥ १८ ॥

कृतविश्वशिवावृत्तिं लुभसितवसुमेरुमुपनतरजतगिरिम् ।
हराहृतरत्नाकरं वृषोपकल्पितामरोदत्तकान्तम् ॥ १९ ॥

कृत इत्यादि । कृता विश्वस्य जगतः कल्याणस्य आवृत्तिर्येन सेतुना । वसु मुक्तादिरत्नं । वृषा इन्द्रः । मन्दोदरीदयितवन्दीकृतानां वृन्दारकसुन्दरीणां दत्तकान्तः सम्भोगो येन ।

अन्यच्च कृता पिशुनकशृगालानां वृत्तिर्वर्त्तनं येन रणेन वसु धनं इह हि सकलजनसुलभसमस्तवस्तुसम्भारोपलम्भविजृम्भमानलोभक्षोभितैरुत्तमधमैरपि किं पुनरधमैरुद्दामधामभिदुर्द्दुरुढैर्द्राग्जितकलोकैः लुभसितं । हीरकमाणिक्यमौक्तिकाद्यनन्तनानारत्नराजिराजितोज्ज्वलविशालकाञ्चनचयरजतपुञ्जाद्यपर्य्यन्तविचित्रकस्तूरिकाकर्पूरकुङ्कुमचन्दनागुरुगहनबहलतराखण्डभाण्डागारं मेरुमिव विपक्षगोत्रोन्मूलनाकर्णनजनितभयेन सपक्षतामुपेत्यो(त्या)पनतं(तां) रजतगिरिमिव चिरविरहविहरदकलोदाकुलकेन भीमभूपतिहृदयपरिहाणभीरुणा हरेण आहृतम् रत्नाकरमिव निजतनुभूपालकुलावलोकनकौतूहलमीलनात् । महीपालविग्रहोपग्रहीकृतमतुलं तुलयितुं तल्लिनेयं अस्मादृशां रसा सहसा साहसिकी "यातु" । वृषोधर्मः सम्प्रहारसङ्कटपातितसुभटपटलोपकल्पितामरवाराधीशसम्भोगं रणं ॥ १९ ॥

सम्यगनुगतरसाशेनाप्रथमसहोदरेण रामेण ।
भीमः स सिन्धुरगतोरणं रचयता किलाबन्धि ॥ २० ॥ कुलकम् ।

सम्यगित्यादि । राघवेण सम्यगकैतवेन अनुगोऽनुगतः तरसाशिनां पलभुजां इनस्य रावणस्या(स्य) प्रथमो द्वितीयः सहोदरः विभीषणो यस्मिन् । राघवः तेन हि भ्रातृभर्त्सितेन आगत्यानुगतः । अगतोरणं पर्व्वतमालां रचयता भीमो भयङ्करः स सिन्धुः समुद्रोऽबन्धि ।

अन्यच्च रामपालेन सम्यगनुगता समासादिता रसाया भुवः आशा येन रणं युद्धं रचयता स भीमो भूपतिः आप्रथं आख्याति यथा भवति तथा दरेण भयेनासहः कातरः सिन्धुरगतो हस्तिगतो वारणश्रेष्ठपृष्ठावतिष्ठमानः शारिकुहरस्थित एव अबन्धि ॥ २० ॥

इदानीं कीदृशोऽसौ सिन्धुर्भीमश्चेति आदिकुलकेन तावुभौ वर्णयन्नाह ।

---

१ This verse and the following have been restored from the commentary.

यमनुप्रविश्य पानीयानां पातारमेकमात्मीयाम् ।
क्षौणीभृतः सपक्षा रक्षां जिष्णोरधुर्द्विषतः ॥ २१ ॥

यमित्यादि । यं अपां पतिं एकं अनुप्रविश्य पर्व्वताः सपक्षा मैनाकप्रभृतयः जिष्णोरिन्द्रादात्मीयां रक्षामधुः ।

अन्यत्र यं भीमं रक्षणीयानां रक्षितारं प्रविश्य सपक्षा भूपालाः द्विषतः शत्रोः जिष्णुराद् स्वरक्षां दधुः ॥ २१ ॥

यत्र विपक्षाणामपि भृतां वाहिनीसहस्राणि ।
निरमज्जन् दुर्व्वाराण्यभितः सर्व्वौघमिलितानि ॥ २२ ॥

यत्रेत्यादि । पर्व्वतानां नदीसहस्राणि ओघः प्रवाहः ।

अन्यत्र राज्ञां चमूसहस्राणि सर्व्वौघः सर्व्वसन्नाहिका ॥ २२ ॥

यस्मिन् रत्नानामाश्रये सरस्वत्यपि[१] स्वयं लक्ष्मीः ।
ते पारिजातबाजिप्रवरकरीन्द्राद(दा)योऽप्यासन् ॥ २३ ॥

यस्मिन्नित्यादि । सरस्वति समुद्रे, अपि समुच्चये, लक्ष्मीस्ते पारिजात उच्चैश्रव ऐरावत प्रभृतयः स्थिताः ।

अन्यत्र सरस्वती भारती लक्ष्मीस्ते अपगतारिजाता अश्वप्रवराः करीन्द्राः सुभटाश्च ॥ २३ ॥

विश्वम्भरेण लक्ष्मीर्लेभेऽमृतमप्यलम्भि सुमनोभिः ।
किञ्च लभते स्म शम्भू राजानं यं समासाद्य ॥ २४ ॥

विश्वेत्यादि । यं सिन्धुं प्राप्य कृष्णेण लक्ष्मीः देवैरमृतं लब्धं शम्भुः शिव[:] राजानं चन्द्रं लभतेस्म (लब्धं) लब्धवान् ।

अन्यत्र यं राजानं प्राप्य विश्वं जगत् भरेणातिशयेन लक्ष्मीः सम्पदो लेभे । सज्जनैः अयाचितदानं शं कल्याणं भूः पृथ्वी लेभे ॥ २४ ॥

अजीजिवन् जगदखिलं दधतः पारार्थ्यमर्थिनो घ(घा)नाः ।
अच्युतपदमधिरुह्य यस्य च कल्पद्रुमप्रकृतेः ॥ २५ ॥

अजीजिवन्नित्यादि । यस्य सिन्धोः कल्पद्रुमजन्मभुवः अर्थिनो घना मेघा अच्युतपदमाकाशं ।

अन्यत्र यस्य भीमस्य कल्पद्रुमस्वभावस्य सेवकाः याचकाश्च घनाः अविरला अच्युतपदं अस्खलितपदं ॥ २५ ॥

---

१ The text has सर सरस्वत्यपि ।

स भवानीसमुपेतो भुजङ्गमविभूषितः स्वयं देवः ।
द्विजराजकेतुरासीन्मुक्तापुण्यस्य यस्यान्तः ॥ २६ ॥

स भवानीत्यादि । यस्य सिन्धोर्मुक्ताभिश्चारुतरस्य अन्तः द्विजराजकेतुर्गरुड़ध्वजः स भवान्पूज्यः । ईर्लक्ष्मीस्तत्सहितः भुजङ्गमविभौ शेषे उषितः ।

अन्यच्च यस्य भीमस्य त्यक्तं अपुण्यमधर्म्मं येन द्विजराजकेतुश्चन्द्रशेखरः गौरीसहितः सर्पालङ्कृतः ॥ २६ ॥

योऽत्यन्ततोयशोभी राजितदिग्भित्तिरहतमर्य्यादः ।
सुकृतपदव्यालोभेन कृतोत्साहोवहन् महाशयतां ॥ २७ ॥ कुलकम् ? ।

य इत्यादि । यः सिन्धुः अत्यन्तं तोयेन शोभितुं शीलं यस्य ईरया पानीयेन जिता दिग्भित्तिर्येन सुष्ठुकृतपदो व्यालः सर्पो यत्र भेनश्च[न्द्र]स्तेन कृत उत्साहो यस्य महानागः पद्माश्रयः महाशय इति प्रसिद्धएवायं ।

अन्यत्र यो भीमः अत्यन्ततः अतिशयेन यशोभिः कीर्त्तिभिः राजिता दिग्भित्तिर्येन लोभेन कृतो न[1] विहित उत्साहो येन सुकृतपदव्या धर्म्मवर्त्मना महाशयतां महेच्छत्वं अवहत् ॥ २७ ॥

तेनावालम्बि परो वितीर्णरत्ननिधिना धरित्रीभृत् ।
स सुवेलोऽपगताया जनकभुवो वार्त्तयोत्सवं दधता ॥ २८ ॥

तेनेत्यादि । तेन राघवेण अविभिः पर्व्वतैः सेतुपर्व्व(थ)तैः तीर्णो रत्ननिधिः समुद्रः येन अस्व(स्व)नयैव वार्त्तया जनकभुवः सीताया अपगताया विमुक्तायाः उत्सवं दधता स सुवेलो नाम धरित्रीभृत् पर्व्वतः परः पारीणः अवा(वाव)लम्बि अध्यासितः ।

अन्यच्च रामपालेन कृतकार्य्येभ्यः सेवकेभ्यः वितीर्णानि रत्नानि नानाविधानि निधयश्च येन तथाहि

"कृतापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः"

सुवेलोपगतायाः शुभलक्षणप्राप्तायाः जनकभुवः पितृभूमेर्वरेन्द्र्या वार्त्तया जनाभ्युदयलक्षणया अजाजीवनरूपया वा उत्सवं दधता स परः शत्रुर्भीमभूपति र्बद्धो गजयूथादवालम्बि अवतारितः ॥ २८ ॥

उद्दामरामसैनिकसंघट्टोत्पिष्टविकटकटकस्य ।
[2]अपसरशरणचरणचारभटीकाः करेणवो यस्य ॥ २९ ॥

उद्दामेत्यादि । सप्तभिः श्लोकैः सुवेलस्य भीमस्य द्वयो(रु)रवस्थां प्रथयति राघवसैनिकानां वानर-

---

१ Superfluous. २ अपसरशरणचार० ।

भटानां सङ्घट्टेन उत्पिष्टो विकटो विषमः कटको नितम्बो यस्य सुवेलस्य अतएव अतुलपराक्रमदुर्निवारवानर-वलविमर्द्दनदलितत्वात् अपसरणं शरणं यस्याः सा तादृशी चरणानां चारभटी वेगशक्तिर्येषां करियूथानां।

अन्यत्र यस्येति भीमस्य विकटो रमणीयः कटकः स्कन्धावारः करिघटा(ट)श्चास्यभूयिष्ठा विनिष्ठ्यूताः पलायाम्बभूवुः ॥ २९ ॥

हरिपरिहृतोपमहिषोविधृतपादाविकोऽभिहतशृङ्गः।
यः परिभवभर[भ]ङ्गुरविगतश्रीकाननाभोगः ॥ ३० ॥

हरीत्यादि। तथा हरिभिः सिंहैः परिहृतः। अपगता महिषयूथा विधृताः पादाव(ध)यः पाद-पर्व्वता अभिहतं शृङ्गं शिखरं यस्य परिभवो विमर्द्दःकाननाभोगो वनाभोगः।

अन्यत्र हरयोऽश्वा वाहिन्निकवलवाहनानि महिषाः पादाविकाः पदातयः शृङ्गं प्रभुत्वं परिभवो-भङ्गुरः आनतो विगतश्रीको मलिनः आननाभोगः बक्ताभोगः ॥ ३० ॥

झगिति विकुरङ्गसङ्गतिरहितोविहतेक्षणश्रवणः(तः)।
विश्वाप(पा)दाश्रयोऽभू[१]द्विकीर्णखड्गादिरपदभूदा(ता)रः ॥ ३१ ॥

झगीत्यादि। वयः पक्षिणः कुरङ्गाः मृगाः ईक्षणश्रवणाः सर्पाः श्वापदाः व्याघ्रादयः खड्गादयो गण्डकगवयप्रभृतयः अपदा अविद्यमानस्थानाः भूदाराः शूकराः।

अन्यत्र विकुः विगतपृथ्वीकः अङ्गानि राज्याङ्गानि ईक्षणं चक्षुः श्रवणं श्रुतिः विकलेन्द्रियत्वात् तदुभयमपि विहतं विश्वापदाश्रयः समस्तविपदाश्रयः विकीर्णखड्गादिः अपास्तनिस्त्रिंशादिशस्त्रजातः। अपद-भुवो अविद्यमानपादारोपणस्थाना दाराःकलत्राणि यस्येति यथायथं नेयं ॥ ३१ ॥

[२]विहितगुरुगण्डमण्डलनिर्झरभरकुञ्जराजिवैतथ्यं।
मुखरितगुहावलिवलन्निर्घोषोऽधिकन्दरक्षुभितः ॥ ३२ ॥

विहितेत्यादि। विहितं गुरूणां गण्डानां गण्डशैला(वा)नां मण्डल[स्य]समूहस्य तथा निर्झराणां भरस्य सम्भारस्य तथा कुञ्जानां राजेः पङ्क्तेः वैतथ्यमन्यथाभावो यस्य गिरेः प्रतिध्वनिभिः मुखरितासु गुहावलीषु वलन् वानरवलस्य निर्घोषो यत्र अधि अधिकं कन्दरेषु क्षुभितं क्षोभो यत्र।

---

१ Here is a redundant वि in the text.

२ The text is corrupt; nearly two pādas of the last verse have entered into this. The verse is completely restored from the commentary.

अन्यत्र विहितं गुरूणां गण्डस्थलस्य निर्झरं मदप्रवाहं बिभ्रतां कुञ्जराणां आजेः सङ्गरस्य वैतथ्यं वैफल्यं यस्य मुखरितगुभिः मुखरितदिग्भिः हावलिभिः हाहाकारैः बलन् सैन्यस्य निर्घोषो यस्य दरेण भयेन चुभितः अधिकं यथा भवति ॥ ३२ ॥

अपि विफलपत्त्रपल्लव[1] तदभ्यासगहनमद्राक्षीत् ।
बहुधातुरञ्जितं यमवसन्ननानाकरं लोकः ॥ ३३ ॥

अपीत्यादि । विगतानि फलपत्त्रपल्लवानि येषां तानि तादृंशि अभ्यासगहनानि उपवनानि यस्य गिरेः बहुभिर्धातुभिः गैरिकहरितालकठिन्यादिभिः रञ्जितं अवसन्ना नाना अनेके आक(का)राः खनयो यस्य ।

अन्यत्र विफलः पत्त्राणां करितुरगमहिषाणां पल्लवो विस्तारः तथा काण्डादीनामस्त्राणां अभ्यासगहनं अभ्यसनकष्टं यस्य भीमस्य बहुधा बहुभिः प्रकारैः शोकभयादिभिरातुरं जितं पराजितं अवसन्नो नाना उभयः करो हस्तो यस्य "नानानेकोभयान्वयोः" ॥ ३३ ॥

कूटप्रस्थविभागैः सौवर्णैं राजतैर्मणिमयैर्यः ।
द्रागदयाटिकपीनपरिग्रहविहतैः विगतश्रीः ॥ ३४ ॥

कूटप्रस्थेत्यादि । द्राक् शीघ्रं अदयं निर्द्दयं अटितुं शीलं येषां तैः कपीनस्य वानरपतेः परिग्रहैः परिवारैः सैनिकैः कर्त्तृभूतैः विहतैः चुण्णैः कूटानां[2] शिखराणां प्रस्थानां सानूनां विभागैः सुवर्णादिमयैर्हेतु-भूतैर्विहीना श्रीः शोभा यस्य ।

अन्यत्र द्राक् अदयाटिकानां दण्डदियावर्गाणां (?) पीनेन स्थूलेन परिग्रहेण विहतैः र्विभावितैः कूटेन राशिना प्रस्थेन परिमाणविशेषेण कृतैर्विभावितैर्भागैः सुवर्णादिमयैर्हेतुभिः विहीना श्रीः सम्पत्तिः यस्य भीमस्य ॥ ३४ ॥

इति यत्र विबुधविद्याधरगन्धर्व्वाङ्गनाभुजङ्गास्ते ।
कल्याप्तमारधारितसुरता अपि दुरमनायन्त ॥ ३५ ॥

इतीत्यादि । इत्यनन्तरोदितविमर्द्दव्यतिकरेण यत्र सुवेले विबुधादीनां अङ्गनानां भुजङ्गास्ते वानरादयः कल्यया मदिरया उद्दीप्तत्वात् आप्तो मारो मन्मथस्तेन धारितं सुरतं येषां ते तादृशा अपि दुर्म्मनायिताः ।

अन्यत्र इत्यनन्तरोदीरिततद्दंशावमाने सति यस्मिन् भीमे ते सुभटा भीमसहायाः ॥ ३५ ॥

अथ बहुतरसा हत्या युक्तो रामेण वित्तपालस्य ।
सूनोरभ्यासे[3] सहसा सैरेशितनयः प्रैषि ॥ ३६ ॥

---

१ The text has षडाद्य after पल्लव, which is evidently wrong.

२ The last page of the MS. of the Comm. commencing here has been retraced with ink and so is very unreliable.

३ स ।

अयमातिथ्यकृतार्थोऽलभताभिमतं न पुण्यजनतोऽस्मात् ।
सपरिणतिरङ्गदोरीहितमस्यन् कमबहदर्कभुवः ॥ ३७ ॥
अथ भीमानीकं तेन महातरसाशनैरमेयबलम् ।
समचीयत हरिसुहृदा सुविहतपर[म]ण्डलावरोधेन ॥ ३८ ॥
क्षिप्तविपक्षावनिना कौशबलेनेत्सैतं महोत्साहात् ।
उन्मूलितेरितपरस्परकृतसङ्घट्टनागचयम् ॥ ३९ ॥
सम्भ्रमदङ्कर(रु)क्षोभिरुचितमुरुवाजिराजिदीर्णधरम् ।
व्यस्तदशमस्तकापत्यसार्थमीरिततरोत्थितमनोरथकम् ॥ ४० ॥
दैवेन[न]र(व)जीवितमभिजिघांसुनापत्यपत्तिपटलेन ।
विहितान्योन्यप्रतिबन्धेनोपर्य्युपरि स(स्व)म्बाधम् ॥ ४१ ॥
बहुरुधिरस्रोतोबहमवधूतकबन्धमूर्द्ध-चय-निचितम् ।
कासरवाहनकवलक्षिप्तमहाशरकलापमिति (कुलकम्) ॥ ४२ ॥
विग्रहदानप्रावितमहाद्रविणकुम्भकर्णमहिमासौ ।
शुशुभे शुभंयुसूनुर्विस्वाहितरक्षसामन्तः ॥ ४३ ॥
शक्ति जगद्विजयिनी[1](वृषजयिनी) वृषजयिनस्तस्य सूनुमप्यसजत ।
स मूर्च्छितोऽयमनया धाम धरायां निवेशयास ॥ ४४ ॥
उरुतरतरसोपक्रम्योत्पाट्याकृष्टविपुलभूमिभृता ।
तदनु जगत्प्राणभुवा सम्पादितपरमहौषधीकेन ॥ ४५ ॥
तेन प्रतिहतमोहेन लक्ष्मणेनारिराकलितमायः ।
निन्ये मृत्युस्थानं जेता स पराक्रमेण हरेः (युग्मकम्) ॥ ४६ ॥
रामेणोचितरूपा कापि दशास्यो[प]हिता विपद्घोरा ।
स्वशिरश्छेदव्यतिकरमदर्शदेष स्वयं हि दशा ॥ ४७ ॥
अथ तेन गगन[2]खेलत्खगमण्डलिकाविलासविषयस्य ।
उत्कृत्तकण्ठकाण्डव्रजनिर्य्यद(ज)स्रक्छटाजटालस्य ॥ ४८ ॥
निहतकुटुम्बस्य पुरो दारुणमास्कन्दनं किमपि दधतः ।
धृतचन्द्रहासधाम्ना लङ्काराजः कृतोऽस्य वधः (युग्मकम्) ॥ ४९ ॥

इति रामचरिते . . . . . नामको द्वितीयपरिच्छेदः ।

---

१ Seems to be redundant. २ T. ण ।

अथ तृतीयपरिच्छेदः ।

कर्षन् धनञ्जयाम्ना[ं][1] शुचिमयोनिजा[ं] प्रजाजननीम् ।
स चिराय चरितरक्षोभुवमिष्ट[त]मामु(म्न)रीचक्रे ॥ १ ॥
कुर्व्वद्भिः शं(श)देवेन श्रीहेत्वीश्वरेण देवेन ।
चण्डेश्वराभिधानेन किल क्षेमेश्वरेण च सनाथैः ॥ २ ॥
स्फुरदुच्चदेवमुख्यैः सक्षेचद्वादशादित्यैः ।
साक्षात्संप्रत्ययविधिपरमाधिष्ठानमान्यतमैः ॥ ३ ॥
स्कान्देन तेन सविनायकेन मिलितैः प्रकाशरूपैस्तैः ।
रुद्रैरेकादशभिर्वसुभिर्विततास्पदैर्विश्वैः ॥ ४ ॥
अकृत[2]भयसद्म(द्व)पुरप्रांशुप्रासादचेदी(दि)वास्तव्यैः ।
उपनमदाशापालैर्देवै[ः] सम्भाविताकलुषभावाम् ॥ ५ ॥
भगवद्भिरपि विप्रवरैरपि प्रशान्ततमैरपि चानूचानैः ।
… …परमर्षिभिरुपापादितव्रतोत्कर्षाम् ॥ ६ ॥
मन्द्राणां स्थितिमूढां जागद्दलमहाविहारचितरागाम् ।
दधती[ं] लोकेशमपि महत्तारोदीरितोरुमहिमानम् ॥ ७ ॥
अपरिमितपुण्यभूमिं(मि) सत्याचारैककेतनमभेद्यम् ।
विपुलतरपुण्यकीर्त्तिभिरभिहित(तः)शुचिभावमुपजा[ता]म् ॥ ८ ॥
ब्रह्मकुलोद्भवां[3] स्कन्दनगरेण मूर्च्छितामितापचिति[म्] ।
तैरतिगुरूत्प[ला]वासैरस्वप्नैर्व्भरि[त]शोणितपुराञ्च ॥ ९ ॥
अप्यभि[4]तो गङ्गाकरतोयानर्घप्रवाह(हा)पुण्यतमाम् ।
अपुनर्भवाह्वयमहातीर्थविकलुषोज्वलामन्तः ॥ १० ॥
अपि पृथुकच्छबलभीक्षशतरकालीक्षतोत्थानम् ।
अपि विश्रुतफलाशिष्टतामशोकवन्याम्नाम्[5] ॥ ११ ॥
परमविरलकन्दाबलिमयमविरलकलकण्ठकूज[6]न्मुखम् ।
पृथुलककुचश्रीफलकम्पनसहितं लोलमञ्जुलवनीकम् ॥ १२ ॥

---

१ Text ताव । २ Text तो । ३ T. कुलद्भवा ।
४ T. वि । ५ Metre does not come out at all. ६ T. जि ।

प्रबलद्विक्रमकन्दलशोभाधरमीक्षणामृतौघमुचम् ।
तरलभ्रमरकमुरु[1]गन्धवहानिललहरी[2]लीनम् ।
किञ्च बहुनागरङ्ग(ङ्क)ञ्जितवन्तं वासवोद्यानम् ॥ १३ ॥
व्यभिचारिभिरालस्यग्लानिश्रमदीनताविषादयुतैः ।
उन्मादमोहचिन्तोत्सुकतानिर्वेदनादिभिर्भावैः ॥ १४ ॥
अघसंसूचकचेतोबुद्धिव्याहारविग्रहारम्भैः ।
विपुलकसात्त्विकभावैरुपपादित(रुपपदि)सम्प्रयोगञ्च ॥ १५ ॥
निदधानं मनसि प्रियममृतादिभिरर्घितं स(सा)दा रामम् ।
करुणमहितमगन्धं प्रियाश[3]या बद्धजीवनं दधतीम् ॥ १६ ॥
बहुधान्यराजसं(स)हतिसम्भावितकाम्यरूपया लक्ष्मग(क्ष्मा) ।
सद्वंशास्तारि[त]या प्रस्फुरदिक्ष्वाकुशेखराभरण[ा]म् ॥ १७ ॥
प्रबलबलजाक्रमसमुद्भवधनलाभाम[ा]पन्नोर्व्वीम् ।
धात्रीमपि प्रियङ्गोरतनु[ ]सदेलोद्भवक्षेत्राम् ॥ १८ ॥
फलरसमितसुधाशनपूगोद्यानप्रसाधनैकदिशम् ।
फलिताञ्च नारिकेलावासिन्येषेति जगति सा[4]र्द्रमुखाम् ॥ १९ ॥
पृथुसुमनःपरनागापरकेसरमालभारिणीं दधतीम् ।
प्रवलमधुपारिजातलवङ्गमितामोदसम्पत्तिम् ॥ २० ॥
करकमलापाटलमतिसुरभितया केसरं नदद्भ्रमरम् ।
दधतीं मधुराणां वाचामे[5]यानां यथाक्रमाद्रेखाम् ॥ २१ ॥
दरदलित-कनक-केतककान्तिमप्यशेषकुसुमहिताम् ।
अरविन्देन्दीवरमयसलिलसुरभिशीतलश्वसनाम् ॥ २२ ॥
अपि धवलधामलेखालक्ष्मीभाराभिरामपुरलीलाम् ।
निरुपरि कनक[6]कलसमेलकारपीवर-पयोधराभोगाम् ॥ २३ ॥
सुकलापायितकुन्तलरुचिमाविललाटकान्ति[7]मवनमदङ्ग[ा]म् ।
अधरितकर्णाटेक्षणलीला[ ] धृतमध्यदेशतनिमानमपि ॥ २४ ॥

१ T. र । २ T. लि । ३ T. ग्रा । ४ स्वा ।
५ Text म्ये । ६ T नकक । ७ T माविलनाटकान्ति ।

सद्रुचिरोमावलिमहितामव्यस्ता बलीर्दधतीम् ।
दोषं विसन्दधाना[1] बहुलतरारोहपरिणाहाम् ॥ २५ ॥
पृथुतरपुष्करिणीप्रियगतिमतिकदप्रकाण्डजघनाञ्च (च) ।
पुण्य[ा]वदानाहक्षणदेशाङ्कुवलयजितञ्च दृशा ॥ २६ ॥
क्रूरकरापीड़िताममाबिति भर्त्तुर्म्मृदुकरग्रहात् क्रपया ।
क्लष्टोपचितां सपदि स्खलितप्रतिपक्षमारदहनशुचम् ॥ [कुलकम्] २७ ॥
अभिजनजातैरपि साधुभिः सहसा लोकैः कृतबहुपदोपनतिम् ॥ २८ ॥
अमरावतीसमानाने[क]वरेन्द्रीकृतातङ्काम् ।
सुमनोभिरभिव्याप्ता[1] निष्प्रत्यूहाम्रतस्य परिपूर्णैः ॥ २९ ॥
पुण्यजनानां वसतिमसाधुव्यवहारसङ्कथाशून्याम् ।
स कथाविपुलमानवाभय(र)दा(ज)मुदग्रदेवकुलजाताम् ॥ ३० ॥
दधती[1] रत्नानां पटल[1] पृथुलं कामितां सुरेश्व[र]पुरीम् ।
रामावतीमतिशुभां सविभीषणशासनाम्रतस्नाताम् ॥ ३१ ॥
अकुरुत महाद्रविणवेष्टितप्रतिष्ठाधिरोपितहरीशः ।
कनकमयधामलेखाधिकरणमपि मेरुशिखरमिव ॥ कुलकं ३२ ॥
वज्रविदूरज-मुक्तामरकत[1]माणिक्यनीलरत्न(चम)खचितैः ।
सुरधामचारुचञ्चन्मरीचिमञ्जरीजालैः ॥ ३३ ॥
आभरणैरुपकरणैर्भूरिभिरभिराम-हेमनिर्म्माणैः ।
वृत्तोरुतारतरलैर्हारैरपि हारिभिर्वहुभिः ॥ ३४ ॥
विविधैर्महाधनैरपि दिव्याङ्गैरंशुकैरतिविचित्रैः ॥ ३३ ॥
कस्तूरीकालागुरुमलयजकाश्मीर[ज]कर्पूरैः ॥ ३५ ॥
उन्मुद्रमन्द्रमधुरातोद्यव्यतिभेदमेदुरोद्गारैः ।
गीतिलयलब्धिसुभरैरधरीकृततुमुलतुम्बुरुध्वनितैः ॥ ३६ ॥
परमारविकाराभिर्युवतिभिरपि देववारवनिताभिः ।
क्वणितमणिकिङ्किणीकं कृतनेपथ्योद्भटनटन्तीभिः ॥ ३७ ॥

१ Text मारक्तकत ।

सरभसविहरन्महिषीहृष्यद्वृषगोसहस्रहाबलि[१]भिः ।
समयोपभुज्यमानैर्भूयिष्ठोत्पादकैर्विषयविसरैः ॥ ३८ ॥
इति राजोपनिवेदितनानाविधरत्नरङ्गरसरभसैः ।
आनन्दैकनिदाने शोभासम्पत्तिभाजि निव्य[ा]जे ॥ ३९ ॥
इह विश्वकर्म्मनिर्म्मितकर्व्वुरमयमन्दिरे मिथो मिलितौ ।
चिरमभिदुरपरिरम्भमरुचतां बलि++माश्विनौ देवौ (कुलकम्) ॥ ४० ॥
[२]अ[ा]टिषत सुमनसामासारै रष्टान्दष्टैः ।
रोचिष्णुणामुनोपरि ध(धा)रणिभृदालैः शिवालयास्त्रितये ॥ ४१ ॥
स विशालशैलमालितालीवद्धमम्बुधि[·] साक्षात् ।
अपि पूर्त्त[३] पुष्करिणीभूतं रचयाम्बभूव भूपालः ॥ ४१ ॥
तुङ्गमहाभोगालिर्धरालघिमभाक् महावनस्वास्थः (स्थाम्भः) ।
तेन व्यधाय्य(जा)नागा नाकस्याहेलया भरभृत् ॥ (?) ४३ ॥
स्वपरित्राणनिमित्तं पत्या यः प्राग्दिशीयेन ।
वरवारणेन च निजस्यन्दनदानेन वर्म्मणाराधे ॥ ४४ ॥
भवभूषणसन्ततिभुवमनुजग्राहजितमुत्कलत्रं यः ।
जगदवतिस्म समस्तं कलिङ्गतस्तान् निशा(षा)चरान् निघ्नन् ॥ ४५ ॥
यो वाजिनामधिभुवा नागाबलिसंयतेरितस्कन्धः ।
कृतसाहायकविधिना देवः (नः)प्रियकारिणाप्रीणि ॥ ४६ ॥
तस्य जितकामरूपादिविषयविनिवृत्तः मानसम्पाद्यः ।
महिमानमायनन्तपो यतमानस्य प्रजाभिरक्षार्थम् ॥ ४७ ॥
इति राजराजभोग्यामलकामिव विविधशेवधिभरसमृद्धां ।
रामावतीं गृहीत्वामूमयोध्यामसौ पुरीं तामगमत् ॥ ४८ ॥

इति रामप्रत्यागमनं नाम तृतीयः परिच्छेदः ॥

---

१ T. विला ।

२ Some letters seem to be lost as the metre does not come out.

३ T. र्द्धं ।

अथ चतुर्थः परिच्छेदः ।

तत्र स राजा निवसन्नानाविषयसन्निवेशेन ।
सूनुसमर्पितराज्यो रामः कान्तासखश्चिरं रेमे ॥ १ ॥
अमुना सती वरेन्द्री याताथदिव्यविषयोपभोगसुखं ।
क्वचिदपि कदापि दुर्ज्जनदू(भू)षितचर्य्या[*] न सा सेहे ॥ २ ॥
कृच्छ्रेण रत्नगभा[*] सूनुस्तस्याज्ञयाशु चातुर्य्यात् ।
जनकभुवमसुमन्त्राश्रितसौतविधिस्ततो वनं निन्ये ॥ ३ ॥
नृपशासनश्रुतिश्रितमूर्च्छा प्रतिपत्तिमियमवाप्य ततः ।
[अन्तः] स्थिति[*] प्रजाया घननेत्रागत[तो]यभराभिदधे ॥ ४ ॥
अभयदमना विलापोदितमन्युकृतसमस्तलोका … …
… … … … विग्रहनिर्ज्जितकामरूपमसृत् ॥ ५ ॥[1]
तं गीतरामचरितं सहजेन समं प्रतीतसुतभावं ।
परमवनस्तमसेचनक[*] रामो राज्यपालमनैषीत् ॥ ६ ॥
उन्मुद्रयता कुमुदं विभावयता शिलान्तरं गोभिः ।
लूनारातिमर्म्म च कलालिना भुवनाधिपोऽमुना मुमुदे ॥ ७ ॥
प्राप्ते काले सरिति(य) दुर्व्वाससा दिताश्रवसेतुः ।
वृषजिन्मथनोऽस्ततनुर्निःश्रेणिकयाद्रिसुतपुरान्तरया ॥ ८ ॥
इत्यधिमुञ्जिरि कलयन् ब्रह्मभुवः स्वं वहुप्रदाताऽसौ ।
कृतनिश्चयः कृत[ा]र्थः प्रास्थित पृथ्वीपति म(र्मा)हासरितं ॥ ९ ॥
जनजाते रु(र)दति शुचा सारवम[व]गाह्य तज्जलं पुण्यं ।
विरहसहपरिजनैर्दुर्विषहं (दूहं) रामो जगाम स स्वभुवं ॥ १० ॥
अथ रक्षता(?)कुमारोदितपृथुपरिपन्थिपार्थिवप्रमदः ।
राज्यमुपभुज्य भरस्य सूनुरगमद्दिव[*] तनुत्यागात् ॥ ११ ॥
अपि शत्रुघ्नोपायाज्ञो(ज्ञो)पालः स्वर्जगाम तत्सूनुः ।
हन्तु[ः] कुम्भीनस्यास्तनयस्यैतस्य सामयिकमेतत् ॥ १२ ॥

---

१ A portion of the sixth verse has been repeated here. The scribe seems to have omitted many verses after this.

अथ तस्य रामनृपतेर्दनुरूत्वर्द्दनावतारस्य ।
अपरः प्रजाप्रमोदाङ्कुरकन्दो नन्दनोऽयमनुरूपः ॥ १३
निखिलनृपलक्षणधरः पुरुषातिशयो जितारिषड्वर्गः ।
विधुतजगदन्धकारो धृतधीरोदात्तनायकप्रकृतिः ॥ १४ ॥
कुशली कुशोकशल्यं रामविरामविद्रवं निराकुर्व्वन् ।
अम्भोधिमेखालाया भुवः प्रभुरभूदभिया मदनः ॥ १५ ॥ (कुलकम्)

अभिषेकसम्भारवितानैर्विश्वाशापूरणपुरा
दिशतात्यर्थमनाथावनात् जनयता जनानन्दं ॥ १६ ॥
हेलाविलूनबलवत्पद्मा(न्द्रा)वलिवलदमिचचक्रेण ।
राजावत[१]सलक्ष्मीभारैकधुरीणतां दधानेन ॥ १७ ॥
दोषास्पर्शोत्कर्षितममहिमातिशयप्रकाशमानेन ।
द्विजपरिकरपरिपालनरुचिनोच्चैर्मण्डलाधिपतिना च ॥ १८ ॥
सख्याच शस्त्रभालक्ष्म्याशाभूतेन चारुवृत्तेन ।
सुहितपरमश्रमेण च सुवर्णजातेन विधिवदर्घ्येण[१] ॥ १९ ॥
सिंहीसुतविक्रान्तेनार्ज्जुनधाम्ना भुवः प्रदीपेन ।
कमलाविकाशभेषजभिषजा चन्द्रेण बन्धुनोपेतम्(ताम्) ॥ २० ॥
चण्डीचरणसरो[ज]प्रसादसम्पन्नविग्रहश्रीकं ।
न खलु मदनं साङ्गेशमीशमगाद् जगद्विजयलक्ष्मीः ॥ २१ ॥
स तथा सिन्धूद्भूष्णुमभीका भर्त्तुं प्रजा अलम्भूष्णुं ।
कुमुदस्वसारमुररीकुर्व्वन्न[ा]सीदसीमसामाप्तः ॥ २२ ॥
स मनोभूरनिरुद्धप्रभवो विषमायुधो रतिप्रणयी ।
सुमनःसमयं [प]रमयुज्यत क्ष्मापति[२]माकुलग्रामः ॥ २३ ॥
धुतमानप्रमदेनानेन न कोपोहितः सहजधैर्य्यात् ।
प्रकटितवलाहिताशीलोभञ्जितवान(ना)हिताविद्वाम(द्वम्) ॥ २४ ॥
मदनस्त्व(त्वा)मिति वितथञ्चिन्त[न]ममारात्मकोप्यकामोपि ।
अपि शम्बराभ्युदयमप्यङ्गसकल[१] दधाति निरपायम् ॥ २५ ॥

---

१ T दाम्नोन।  २ त्व्यापि।

अमु[ना] शङ्करनयनाग्निताङ्गजातः क्रियेत पर एव ।
अगणेया वाणबलिरस्य परस्यैव पञ्चतां तनुते ॥ २६ ॥
उद्यन्महाबल ईर(रा)य(या)ति च जन्यास्यतो [बलम] रौणाम् ।
कालिन्द्यामुत्सेका[1] दमुदनासीरोहितैाघनुदबाहि ॥ २७ ॥
अपरो रामः सम्यक्कृतकालाच्छादनामुक्तिः ।
इत्येष मदन(ना)पालोऽपि न वाम[ा]लम्बितः प्रजापालः ॥ २८ ॥
दाता विपक्षभिदुरः समादानरतो वृषाध्वरतः ।
विलसज्जय(या)न्ततनयं सहस्रदृष्टिर्दधाति पदमैन्द्रम् ॥ २९ ॥
काष्ठान्तानुगतेजा आज्यारूढ(ढा)प्रकर्षहेतिरयम् ।
अभ्रकुसुमायितोप[ला]लिको(वो) नलोहितोचरु(र)चिः ॥ ३० ॥
महिषीपत्यवतंसितपादाम्भोजः प्रमोदयन्मित्रम् ।
साक्षात् स धर्म्मराजः समवर्त्ती जगति दण्डधरः ॥ ३१ ॥
सहित-कुमुदारोहो दोषा[च]र[स]ञ्चारबाञ्छः ।
अतिबहलकटकबलनोल्वणभीकारी रमेत पुण्यजनः ॥ ३२ ॥
अपि के रतिपरमया स(श)मवति वरमाशामनाश्रितं लोकम् ।
अपि च कविचक्रवर्त्त्युद्भवभूरेष प्रचेताः स्यात् ॥ ३३ ॥
स्पर्शन एष ख्यातः सुमनोवर्त्म व्रजन् कुरङ्गवरः ।
भङ्गान्दोलनतरलाकारि मदारा(वा)रिसन्ततिस्तेन ॥ ३४ ॥
विहितावदातगोत्रस्थितिरर्घितगुणनिधिः शिवप्रणयी ।
अयमेव सार्व्वभौमस्कन्धोपरि राजति सीदन्[2] ॥ ३५ ॥
या भोग[व]ती या सुरणदीक्षिता मर्त्यमश्नुते या ताम् ।
रमयति कपर्दकरोटिमृतां महावाहिनीमीशः ॥ ३६ ॥
पातालस्थेनो मिलितः स म(मा)हानागवाहिनीनेता ।
स विभर्त्ति भूतधात्रीमधिशेते तं हरिः श्रिया सहितः ॥ ३७ ॥
अवनतह[ं]सश्रेणिर्विबुधज्येष्ठः पिताम(मा)हो धाता ।
कीर्त्तित एष ब्रह्माण्डगताखिललोकचित्रकर्म्महिमा ॥ ३८ ॥

---

१ T. त्सेषा ।  २ T. शौदः ।

वृत्तं निस्तारेण विलीनो दोषाकरः सुकृतमुदितम् ।
सति मिन्द्रे(?)ऽस्मिन् जगतां कृतकमलोन्मेषकैरवक्लेशे ॥ ३९ ॥
अपि स तनुते न राजीवमलङ्कुरुते सम्भावि[त][वि]बु[ध]वीथीम् ।
शुचिपक्षैकप्रणयी हरिणोपेतान्तरो [रा]जा ॥ ४० ॥
इत्थं सर्व्वाशानां तासां परिपालकत्वमातन्वन् ।
राजत्यसकृत्[1] सुकृतमुदितं चैषणो लोकपालानाम् ॥ ४१ ॥
अथवा रामस्यायं साक्षात् पुरुषोत्तमावतारस्य ।
पुत्रः पुरुषोत्तम एव आत्मा वै जायते पुत्रः ॥ ४२ ॥
स तथा हि सदानन्दकरः परपाञ्चजन्यमुद्वहति ।
सहितसुदर्शन एकः कलयति कौमोदकीं देवः ॥ ४३ ॥
त्राता दोषश्चतुरस्तु तादृक्शास्त्रधारिणो बिभ्रत् ।
सततं विनतानन्दन आरूढोऽयं विभुर्जयति ॥ ४४ ॥
कलधौतच्छायाधारयशोभिरतिप्रकर्षतः शश्वत् ।
अयमम्बरं पिधत्ते हृदि विबुधरमोमा[म]पि ॥ ४५ ॥
सरसीरुहनयनो विष्णुस्तेन(नः) सोदरः सुरेन्द्रस्ये[व] ।
लक्ष्मीसरस्वतीभ्यां निश्रितो[2]यमच्युतो भगवान् ॥ ४६ ॥
अमुनोत्क्षिप्तो त्रामवता गोवर्द्धनो धरित्रीभृत् ।
प्राप्य कलिङ्गफणभुजमपि कं स जीवयेन्नायम् ॥ ४७ ॥
इति मदनोदितवृत्तान्त[ः] सन्देशतो[3] बनकुशोदकशयः सततम् ।
दाता चिराय राज्यं राजा कुरुतां चितोरुतरकीर्त्तिरयम् ॥ ४८ ॥

इति रामोत्तरचरितं नाम चतुर्थः परिच्छेदः ।

---

१ T. राजत्यसः । २ T. निश्रितमय । ३ T. दन्सतो ।

कविप्रशस्तिः ।

वसुधाशिरोवरेन्द्रीमण्डलचूड़ामणि[1]ः कुलस्थानं ।
श्रीपौण्ड्रवर्द्धनपुरप्रतिवद्धः पुण्यभूः वृहद्वटुः ॥ १ ॥
तत्र विदिते विद्योतिनि नन्दिरत्नसन्ताने ।
समजनि पिनाकनन्दी नन्दीव निधिर्गुणौघस्य ॥ २ ॥
तस्य तनयो मतनयः करणानामग्रणीरनर्घगुणः ।
सान्धिश्रीपदासम्भाविताभिधानतः प्रजापतिर्जातः ॥ ३ ॥
नन्दिकुलकुमुदकाननपूर्णेन्दुर्नन्दनोऽभवत्तस्य ।
श्रीसन्ध्याकरनन्दी पि(स)शुनास्कन्दी सदानान्दी ॥ ४ ॥
काव्यकलाकुलनिलयो गुणमणिमेरुर्मणीषिणामीशः ।
सीमा साहित्यविदामशेषभाषाविशारदः स कविः ॥ ५ ॥
स्तोकैस्तोषितलोकैः श्लोकैरक्लेशनश्लेषैः ।
घटनापरिस्फुटरसैः गम्भीरोदारभारतीसारैः ॥ ६ ॥
कलिसीम्नि धर्म्मराजः कृतानुगम् तद्युगं विभूषयतः ।
भर्त्तुः समस्तजगतामभिनवनारायणावतारस्य ॥ ७ ॥
रामस्येदं चरितं रुचिर[मर]चि रचनाविरिञ्चिरतिचित्रम् ।
अनवद्यशब्दविद्याकोविदवृन्दारकोऽवादीत् ॥ ८ ॥
रामस्यास्तामास्थिरमाजलमाज्ज्वलनमापवनमागगनं ।
कीर्त्तिः सन्ध्याकरकविसूक्तिसुधासिन्धुराजमणिराजिरियं ॥ ९ ॥
गौरीहितास्तु मुक्तावलिरघिगुणरूपजात्यलङ्कारासौ ।
प्रियदृष्टिरघा(धा)धानकलाभङ्गिरीशकण्ठैकगतिः ॥ १० ॥
अवदान(ना)म् रघुपरिवृढगौड़ाधिपरामदेवयोरेतत् ।
कलियुगरामायणमिह कविरपि कलिकालवाल्मीकिः ॥ ११ ॥
यः पुनरत्र खलोस्मादभूततद्भावतः खलीकारः ।
अखलस्येति विलसितम् साधुत्वस्यैव किमिह करवाम ॥ १२ ॥

---

१ T. ममणिः ।

सोऽस्तु खलोयदनुगमे विगुणेन ग(गा)वा कृतप्रबन्धानां ।
बहुलीकृते हितफलः सञ्चारो[1] लोकधान्यतो दृष्टः ॥ १३ ॥
अवरञ्चि[2] कौर्षत्युच्चैर्दोषाशयेन यो भान्तं ।
उपरि कलानिधिमन्धः साक्षाद्देष स्वमेव मलिनयति ॥ १४ ॥
क्वापि क्वाप्यास्माभिर्जडमन्तरगाधं(धां) पङ्कमभिशङ्क्य ।
गुणनिवहनिविड़वन्धा गुप्तासीत् गौ रसस्रवन्तीयं ॥ १५ ॥
रसनागवशा च निरगात् पदगत्या चित्रपाठबन्धेव ।
तामुद्वर्त्तुमितस्ते शतशः स्वयमासते सन्तः ॥ १६ ॥
एत सत एव(वा) हृदयाद् ये सारस्वतमवन्त्ये(न्ता)नं ।
शूराः स्वरादपि सुधां यन्त्ररसनापूतेन सिञ्चन्ति ॥ १७ ॥
शुचिरुचिरवक्रिमकलामयमिदमुदितं ग(गा)वामधिप ते रत्नं ।
शब्द(ब्दा)गुणभूषणाद्भुतमुत्तंसयते सते गिरीशाय नमः ॥ १८ ॥
योयं गदितो नागस्कन्धक्षितिभृन्मया विदितगोसारः ।
परमविलासिनमेन[ ] हरिमिव हरिकेतनम् कथमिव स्तौमि ॥ १९ ॥
सारस्वतं किमपि तज्ज्योतिरुपाद्ध्वं बुधा यदभ्यासमृतां किमिवोद्धारा[ः] ।
[3]द्वैतं चिति किमच किमच काममभिनते भावाः ॥ २० ॥

इति श्रीसन्ध्याकरनन्दिविरचितं रामचरित नाम काव्यं समाप्तम् ।

यथादृष्टेत्यादि श्रीशीलचन्द्रस्य ।

---

१ T. °री ।  २ T. वाश्चि ।  ३ Some letters lost here.

BRITISH MUSEUM NATURAL HISTORY
PRESENTED